# शिवोपनिषत्

Exported from ambuda.org on 2025-12-23 05:02:44 UTC

1.1

कैलासशिखरासीनम् अशेषामरपूजितम् कालघ्नं श्रीमहाकालम् ईश्वरं ज्ञानपारगम् ॥

1.2

संपूज्य विधिवद् भक्त्या ऋष्यात्रेयः सुसंयतः सर्वभूतहितार्थाय पप्रच्छेदं महामुनिः ॥

1.3

ज्ञानयोगं न विन्दन्ति ये नरा मन्दबुद्धयः ते मुच्यन्ते कथं घोराद् भगवन् भवसागरात् ॥

1.4

एवं पृष्टः प्रसन्नात्मा ऋष्य् आत्रेयेण धीमता मन्दबुद्धिविमुक्त्यर्थं महाकालः प्रभाषते ॥

1.5

1.6

पुरा रुद्रेण गदिताः शिवधर्माः सनातनाः देव्याः सर्वगणानां च संक्षेपाद् ग्रन्थकोटिभिः ॥

1.7

आयुः प्रज्ञां तथा शक्तिं प्रसमीक्ष्य नृणाम् इह तापत्रयप्रपीडां च भोगतृष्णाविमोहिनीम् ॥

1.8

ते धर्माः स्कन्दनन्दिभ्याम् अन्यैश् च मुनिसत्तमैः सारमादाय निर्दिष्टाः सम्यक्प्रकरणान्तरैः ॥

1.9

साराद् अपि महासारं शिवोपनिषदं परम् अल्पग्रन्थं महार्थं च प्रवक्ष्यामि जगद्धितम् ॥

1.10

शिवः शिव इमे शान्तनाम चाद्यं मुहुर्मुहुः उच्चारयन्ति तद् भक्त्या ते शिवा नात्र संशयः ॥

1.11

अशिवाः पाशसंयुक्ताः पशवः सर्वचेतनाः यस्माद् विलक्षणास् तेभ्यस् तस्माद् ईशः शिवः स्मृतः ॥

1.12

गुणो बुद्धिर् अहंकारस् तन्मात्राणीन्द्रियानि च भूतानि च चतुर्विंशद् इति पाशाः प्रकीर्तिताः ॥

1.13

पञ्चविंशकम् अज्ञानं सहजं सर्वदेहिनाम् पाशाजालस्य तन् मूलं प्रकृतिः कारणाय नः ॥

1.14

सत्यज्ञाने निबध्यन्ते पुरुषाः पाशबन्धनैः मद्भावाच् च विमुच्यन्ते ज्ञानिनः पाशपञ्जरात् ॥

1.15

षड्विंशकश् च पुरुषः पशुर् अज्ञः शिवागमे सप्तविंश इति प्रोक्तः शिवः सर्वजगत्पतिः ॥

1.16

यस्माच् छिवः सुसंपूर्णः सर्वज्ञः सर्वगः प्रभुः तस्मात् स पाशहरितः स विशुद्धः स्वभावतः ॥

1.17

पशुपाशपरः शान्तः परमज्ञानदेशिकः शिवः शिवाय भूतानां तं विज्ञाय विमुच्यते ॥

1.18

एतद् एव परं ज्ञानं शिव इत्य् अक्षरद्वयम् विचाराद् याति विस्तारं तैलबिन्दुर् इवाम्भसि ॥

1.19

सकृद् उच्चारितं येन शिव इत्य् अक्षरद्वयम् बद्धः परिकरस् तेन मोक्षोपगमनं प्रति ॥

1.20

द्व्यक्षरः शिवमन्त्रो ऽयं शिवोपनिषदि स्मृतः एकाक्षरः पुनश् चायम् ॐ इत्य् एवं व्यवस्थितः ॥

1.21

नामसंकीर्तणाद् एव शिवस्याशेषपातकैः यतः प्रमुच्यते क्षिप्रं मन्त्रो ऽयं द्व्यक्षरः परः ॥

1.22

यः शिवं शिवम् इत्य् एवं द्व्यक्षरं मन्त्रम् अभ्यसेत् एकाक्षरं वा सततं स याति परमं पदम् ॥

1.23

मित्रस्वजनबन्धूनां कुर्यान् नाम शिवात्मकम् अपि तत् कीर्तनाद् याति पापमुक्तः शिवं पुरम् ॥

1.24

विज्ञेयः स शिवः शान्तो नरस् तद्भावभावितः आस्ते सदा निरुद्विग्नः स देहान्ते विमुच्यते ॥

1.25

हृद्य् अन्तःकरणं ज्ञेयं शिवस्य आयतनं परम् हृत्पद्मं वेदिका तत्र लिङ्गम् ओंकारम् इष्यते ॥

1.26

पुरुषः स्थापको ज्ञेयः सत्यं संमार्जनं स्मृतम् अहिंसा गोमयं प्रोक्तं शान्तिश् च सलिलं परम् ॥

1.27

कुर्यात् संमार्जनं प्राज्ञो वैराग्यं चन्दनं स्मृतम् पूजयेद् ध्यानयोगेन संतोषैः कुसुमैः सितैः ॥

1.28

धूपश् च गुग्गुलुर् देयः प्राणायामसमुद्भवः प्रत्याहारश् च नैवेद्यम् अस्तेयं च प्रदक्षिणम् ॥

1.29

इति दिव्योपचारैश् च संपूज्य परमं शिवम् जपेद् ध्यायेच् च मुक्त्यर्थं सर्वसङ्गविवर्जितः ॥

1.30

ज्ञानयोगविनिर्मुक्तः कर्मयोगसमावृत्तः मृतः शिवपुरं गच्छेत् स तेन शिवकर्मणा ॥

1.31

तत्र भुक्त्वा महाभोगान् प्रलये सर्वदेहिनाम् शिवधर्माच् छिवज्ञानं प्राप्य मुक्तिम् अवाप्नुयात् ॥

1.32

ज्ञानयोगेन मुच्यन्ते देहपाताद् अनन्तरम् भोगान् भुक्त्वा च मुच्यन्ते प्रलये कर्मयोगिनः ॥

1.33

तस्माज् ज्ञानविदो योगात् तथाज्ञाः कर्मयोगिनः सर्व एव विमुच्यन्ते ये नराः शिवम् आश्रिताः ॥

1.34

स भोगः शिवविद्यार्थं येषां कर्मास्ति निर्मलम् ते भोगान् प्राप्य मुच्यन्ते प्रलये शिवविद्यया ॥

1.35

विद्या संकीर्तनीया हि येषां कर्म न विद्यते ते चावर्त्य विमुच्यन्ते यावत् कर्म न तद् भवेत् ॥

1.36

शिवज्ञानविदं तस्मात् पूजयेद् विभवैर् गुरुम् विद्यादानं च कुर्वीत भोगमोक्षजिगीषया ॥

1.37

शिवयोगी शिवज्ञानी शिवजापी तपोऽधिकः क्रमशः कर्मयोगी च पञ्चैते मुक्तिभाजनाः ॥

1.38

कर्मयोगस्य यन् मूलं तद् वक्ष्यामि समासतः लिङ्गम् आयतनं चेति तत्र कर्म प्रवर्तते ॥

1.39

॥ इति शिवोपनिषदि मुक्तिनिर्देशाध्यायः प्रथमः ॥

2.1

अथ पूर्वस्थितो लिङ्गे गर्भः स त्रिगुणो भवेत् गर्भाद् वापि विभागेन स्थाप्य लिङ्गं शिवालये ॥

2.2

यावल् लिङ्गस्य दैर्घ्यं स्यात् तावद् वेद्याश् च विस्तरः लिङ्गतृतीयभागेन भवेद् वेद्याः समुच्छ्रयः ॥

2.3

भागम् एकं न्यसेद् भूमौ द्वितीयं वेदिमध्यतः तृतीयभागे पूजा स्वाद् इति लिङ्गं त्रिधा स्थितम् ॥

2.4

भूमिस्थं चतुरश्रं स्वाद् अष्टाश्रं वेदिमध्यतः पूजार्थं वर्तुलं कार्यं दैर्घ्यात् त्रिगुणविस्तरम् ॥

2.5

अधोभागे स्थितः स्कन्दः स्थिता देवी च मध्यतः ऊर्ध्वं रुद्रः क्रमाद् वापि ब्रह्मविष्णुमहेश्वराः ॥

2.6

एत एव त्रयो लोका एत एव त्रयो गुणाः एत एव त्रयो वेदा एतच् चान्यत् स्थितं त्रिधा ॥

2.7

नवहस्तः स्मृतो ज्येष्ठः षड्ढस्तश् चापि मध्यमः विद्यात् कनीयस् त्रैहस्तं लिङ्गमानम् इदं स्मृतम् ॥

2.8

गर्भस्यानतः प्रविस्तारस् तदूनश् च न शस्यते गर्भस्यानतः प्रविस्ताराद् तदुपर्य् अपि संस्थितम् ॥

2.9

प्रासादं कल्पयेच् छ्रीमान् विभजेत त्रिधा पुनः भाग एको भवेज् जङ्घा द्वौ भागौ मञ्जरी स्मृता ॥

2.10

मञ्जर्या अर्धभागस्थं शुकनासं प्रकल्पयेत् गर्भाद् अर्धेन विस्तारम् आयामं च सुशोभनम् ॥

2.11

गर्भाद् वापि त्रिभागेन शुकनासं प्रकल्पयेत् गर्भाद् अर्धेन विस्तीर्णा गर्भाच् च द्विगुणायता ॥

2.12

जङ्घाभिश् च भवेत् कार्या मञ्जर्यङ्गुलराशिना प्रासादार्धेन विज्ञेयो मण्डपस् तस्य वामतः ॥

2.13

मण्डपात् पादविस्तीर्णा जगती तावदुच्छ्रिता प्रासादस्य प्रमाणेन जगत्या सार्धम् अङ्गणम् ॥

2.14

प्राकारं तत्समन्ताच् च गुपुराद् आलभूषितम् प्राकारान्तः स्थितं कार्यं वृषस्थानं समुच्छ्रितम् ॥

2.15

नन्दीश्वरमहाकालौ द्वारशाखाव्यवस्थितौ प्राकाराद् दक्षिणे कार्यं सर्वोपकरणान्वितम् ॥

2.16

पञ्चभौमं त्रिभौमं वा योगीन्द्रावसथं महत् प्राकारगुप्तं तत् कार्यं मैत्रस्थानसमन्वितम् ॥

2.17

स्थानाद् दशसमायुक्तं भव्यवृक्षजलान्वितम् तन् महानसम् आग्नेय्यां पूर्वतः सत्त्रमण्डपम् ॥

2.18

स्थानं चण्डेशम् ऐशान्यां पुष्पारामं तथोत्तरम् कोष्ठागारं च वायव्यां वारुण्यां वरुणालयम् ॥

2.19

शमीन्धनकुशस्थानम् आयुधानां च नैर्ऋतम् सर्वलोकोपकाराय नगरस्थं प्रकल्पयेत् ॥

2.20

श्रीमदायतनं शम्भोर् योगिनां विजने वने शिवस्यायतने यावत् समेताः परमाणवः ॥

2.21

मन्वन्तराणि तावन्ति कर्तुर् भोगाः शिवे पुरे महाप्रतिमलिङ्गानि महान्त्य् आयतनानि च ॥

2.22

कृत्वाप्नोति महाभोगान् अन्ते मुक्तिं च शाश्वतीम् लिङ्गप्रतिष्ठां कुर्वीत यदा तल्लक्षणं कृती ॥

2.23

पञ्चगव्येन संशोध्य पूजयित्वाधिवासयेत् पालाशोदुम्बराश्वत्थपृषदाज्यतिलैर् यवैः ॥

2.24

अग्निकार्यं प्रकुर्वीत दद्यात् पूर्णाहुतित्रयम् शिवस्याष्टशतं हुत्वा लिङ्गमूलं स्पृशेद् बुधः ॥

2.25

एवं मध्ये ऽवसाने तन् मूर्तिमन्त्रैश् च मूर्तिषु अष्टौ मूर्तीश्वराः कार्याः नवमः स्थापकः स्मृतः ॥

2.26

प्रातः संस्थापयेल् लिङ्गं मन्त्रैस् तु नवभिः क्रमात् महास्नापनपूजां च स्थाप्य लिङ्गं प्रपूजयेत् ॥

2.27

गुरोर् मूर्तिधराणां च दद्याद् उत्तमदक्षिणाम् यतीनां च समस्तानां दद्यान् मध्यमदक्षिणाम् ॥

2.28

दीनान्धकृपणेभ्यश् च सर्वासाम् उपकल्पयेत् सर्वभक्ष्यान्नपानाद्यैर् अनिषिद्धं च भोजनम् ॥

2.29

कल्पयेद् आगतानां च भूतेभ्यश् च बलिं हरेत् रात्रौ मातृगणानां च बलिं दद्याद् विशेषतः ॥

2.30

एवं यः स्थापयेल् लिङ्गं तस्य पुण्यफलं शृणु कुलत्रिंशकम् उद्धृत्य भृत्यैश् च परिवारितः ॥

2.31

कलत्रपुत्रमित्राद्यैः सहितः सर्वबान्धवैः विमुच्य पापकलिलं शिवलोकं व्रजेन् नरः तत्र भुक्त्वा महाभोगान् प्रलये मुक्तिम् आप्नुयात् ॥

2.32

॥ इति शिवोपनिषदि लिङ्गायतनाध्यायो द्वितीयः ॥

3.1

अथान्यैर् अल्पवित्तैश् च नृपैश् च शिवभावितैः शक्तितः स्वाश्रमे कार्यं शिवशान्तिगृहद्वयम् ॥

3.2

गृहस्येशानदिग्भागे कार्यम् उत्तरतो ऽपि वा खात्वा भूमिं समुद्धृत्य शल्यान् आकोट्य यत्नतः ॥

3.3

शिवदेवगृहं कार्यम् अष्टहस्तप्रमाणतः दक्षिणोत्तरदिग्भागे किंचिच् दीर्घं प्रकल्पयेत् ॥

3.4

हस्तमात्रप्रमाणं च दृढपट्टचतुष्टयम् चतुष्कोणेषु संयोज्यम् अर्घ्यपात्रादिसंश्रयम् ॥

3.5

गर्भमध्ये प्रकुर्वीत शिववेदिं सुशोभनाम् उदगर्वाक् च्छ्रितां(?) किंचिच् चतुःशीर्षकसंयुताम् ॥

3.6

त्रिहस्तायाम् अविस्ताराम् षोडशाङ्गुलम् उच्छ्रिताम् तच्छीर्षाणीव हस्तार्धम् आयामाद् विस्तरेण च ॥

3.7

शिवस्थण्डिलम् इत्य् एतच् चतुर्हस्तं समं शिरः मूर्तिनैवेद्यदीपानां विन्यासार्थं प्रकल्पयेत् ॥

3.8

शैवलिङ्गेन कार्यं स्यात् कार्यं मणिजपार्थिवैः स्थण्डिलार्धे च कुर्वन्ति वेदिम् अन्यां सवर्तुलाम् ॥

3.9

षोडशाङ्गुलम् उत्सेधां विस्तीर्णां द्विगुणेन च गृहे न स्थापयेच् छैलं लिङ्गं मणिजम् अर्चयेत् ॥

3.10

त्रिसंध्यं पार्थिवं वापि कुर्याद् अन्यद् दिनेदिने सर्वेषाम् एव वर्णानां स्फाटिकं सर्वकामदम् ॥

3.11

सर्वदोषविनिर्मुक्तम् अन्यथा दोषम् आवहेत् आयुष्मान् बलवाञ् श्रीमान् पुत्रवान् धनवान् सुखी ॥

3.12

वरम् इष्टं च लभते लिङ्गं पार्थिवम् अर्चयन् तस्माद् धि पार्थिवं लिङ्गं ज्ञेयं सर्वार्थसाधकम् ॥

3.13

निर्दोषं सुलभं चैव पूजयेत् सततं बुधः यथा यथा महालिङ्गं पूजा श्रद्धा यथा यथा ॥

3.14

तथा तथा महत् पुण्यं विज्ञेयम् अनुरूपतः प्रतिमालिङ्गवेदीषु यावन्तः परमाणवः तावत्कल्पान् महाभोगस् तत्कर्तास्ते शिवे पुरे ॥

3.15

॥ इति शिवोपनिषदि शिवगृहाध्यायस् तृतीयः ॥

4.1

अथैकभिन्नाविच्छिन्नं पुरतः शान्तिमण्डपम् पूर्वापराष्टहस्तं स्याद् द्वादशोत्तरदक्षिणे ॥

4.2

तद् द्वारभित्तिसंबद्धं कपिच्छुकसमावृतम् पटद्वयं भवेत् स्थाप्य सुवाद्यावारहेतुना ॥

4.3

द्वारं त्रिशाखं विज्ञेयं नवत्यङ्गुलम् उच्छ्रितम् तदर्धेन च विस्तीर्णं सत्कवाटं शिवालये ॥

4.4

दीर्घं पञ्चनवत्या च पञ्चशाखासुशोभितम् सत्कवाटद्वयोपेतं श्रीमद् वाहनमण्टपम् ॥

4.5

द्वारं पश्चान्मुखं ज्ञेयम् अशेषार्थप्रसाधकम् अभावे प्राङ्मुखं कार्यम् उदग्दक्षिणतो न च ॥

4.6

गवाक्षकद्वयं कार्यम् अपिधानं सुशोभनम् धूमनिर्गमनार्थाय दक्षिणोत्तरकुड्ययोः ॥

4.7

आग्नेयभागात् परितः कार्या जालगवाक्षकाः ऊर्ध्वस्तूपिकया युक्ता ईषच्छिद्रपिधानया ॥

4.8

शिवाग्निहोत्रकुण्डं च वृत्तं हस्तप्रमाणतः चतुरश्रवेदि(का) श्रीमन् मेखलात्रयभूषितम् ॥

4.9

कुड्यं द्विहस्तविस्तीऋणं पञ्चहस्तसमुच्छ्रितम् शिवाग्निहोत्रशरणं कर्तव्यम् अतिशोभनम् ॥

4.10

जगतीस्तम्भपट्टाद्यं सप्तसंख्यं च कल्पयेत् बन्धयोगविनिर्मुक्तं तुल्यस्थानपदान्तरम् ॥

4.11

ऐष्टकं कल्पयेद् यत्नाच् छिवाग्न्यायतनं महत् चतुःप्रेगीवकोपेतम्(?) एकप्रेगीवकेन वा(?) ॥

4.12

सुधाप्रलिप्तं कर्तव्यं पञ्चाण्डकबिभूषितम् शिवाग्निहोत्रशरणं चतुरण्डकसंयुतम् ॥

4.13

बहिस् तद् एव जगती त्रिहस्ता वा सुकुट्टिमा तावद् एव च विस्तीर्णा मेखलादिविभूषिता ॥

4.14

कर्तव्या चात्र जगती तस्याश् चाधः समन्ततः द्विहस्तमात्रविस्तीर्णा तदर्धार्धसमुच्छ्रिता ॥

4.15

अन्या वृत्ता प्रकर्तव्या रुद्रवेदी सुशोभना दशहस्तप्रमाणा च चतुरङ्गुलम् उच्छ्रिता ॥

4.16

रुद्रमातृगणानां च दिक्पतीनां च सर्वदा सर्वाग्रपाकसंयुक्तं तासु नित्यबलिं हरेत् ॥

4.17

वेद्य् अन्या सर्वभूतानां बहिः कार्या द्विहस्तिका वृषस्थानं च कर्तव्यं शिवालोकनसंमुखम् ॥

4.18

अग्रार्षसवितुर् व्योम वृषः कार्यश् च पश्चिमे व्योम्नश् चाधस् त्रिगर्भं स्यात् पितृतर्पणवेदिका ॥

4.19

प्राकारान्तर्बहिः कार्यं श्रीमद् गोपुरभूषितम् पुष्पारामजलोपेतं प्राकारान्तं च कारयेत् ॥

4.20

मृद्दारुजं तृणच्छन्नं प्रकुर्वीत शिवालयम् भूमिकाद्वयविन्यासाद् उत्क्षिप्तं कल्पयेद् बुधः ॥

4.21

शिवदक्षिणतः कार्यं तभुक्तेर् योग्यम् आलयम् शय्यासनसमायुक्तं वास्तुविद्याविनिर्मितम् ॥

4.22

ध्वजसिंहौ वृषगजौ चत्वारः शोभनाः स्मृताः धूमश्वगर्दभध्वाङ्क्षाश् चत्वारश् चार्थनाशकाः ॥

4.23

गृहस्यायामविस्तारं कृत्वा त्रिगुणम् आदितः अष्टभिः शोधयेद् आपैः शेषश् च गृहम् आदिशेत् ॥

4.24

इति शान्तिगृहं कृत्वा रुद्राग्निं यः प्रवर्तयेत् अप्य् एकं दिवसं भक्त्या तस्य पुण्यफलं शृणु ॥

4.25

कलत्रपुत्रमित्राद्यैः स भृत्यैः परिवारितः कुलैकविंशद् उत्तार्य देवलोकम् अवाप्नुयात् ॥

4.26

नीलोत्पलदलश्यामाः पीनवृत्तपयोधराः हेमवर्णाः स्त्रियश् चान्याः सुन्दर्यः प्रियदर्शनाः ॥

4.27

ताभिः सार्धं महाभोगैर् विमानैः सार्वकामिकैः इच्छया क्रीडते तावद् यावद् आभूतसंप्लवम् ॥

4.28

ततः कल्पाग्निना सार्धं दह्यमानं सुविह्वलम् दृष्ट्वा विरज्यते भूयो भवभोगमहार्णवात् ॥

4.29

ततः संपृच्छते रुद्रांस् तत्रस्थान् ज्ञानपारगान् तेभ्यः प्राप्य शिवज्ञानं शान्तं निर्वाणम् आप्नुयात् ॥

4.30

अविरक्तश् च भोगेभ्यः सप्त जन्मानि जायते पृथिव्यधिपतिः श्रीमान् इच्छया वा द्विजोत्तमः ॥

4.31

सप्तमाज् जन्मनश् चान्ते शिवज्ञानम् अनाप्नुयात् ज्ञानाद् विरक्तः संसाराच् छुद्धः खान्य् अधितिष्ठति ॥

4.32

इत्य् एतद् अखिलं कार्यं फलम् उक्तं समासतः उत्सवे च पुनर् ब्रूमः प्रत्येकं द्रव्यजं फलम् ॥

4.33

सद्गन्धगुटिकाम् एकां लाक्षां प्राण्यङ्गवर्जिताम् कर्पासास्थिप्रमाणं च हुत्वाग्नौ शृणुयात् फलम् ॥

4.34

यावत् सत्गन्धगुटिका शिवाग्नौ संख्यया हुता तावत्कोट्यस् तु वर्षाणि भोगान् भुङ्क्ते शिवे पुरे ॥

4.35

एकाङ्गुलप्रमाणेन हुत्वाग्नौ चन्दनाहुतिम् वर्षकोटिद्वयं भोगैर् दिव्यैः शिवपुरे वसेत् ॥

4.36

यावत्केसरसंख्यानं कुसुमस्यानले हुतम् तावद्युगसहस्राणि शिवलोके महीयते ॥

4.37

नागकेसरपुष्पं तु कुङ्कुमार्धेन कीर्तितम् यत् फलं चन्दनस्योक्तम् उशीरस्य तदर्धकम् ॥

4.38

यत् पुष्पधूपभष्यान्नदधिक्षीरघृतादिभिः पुण्यलिङ्गार्चने प्रोक्तं तद् धोमस्य दशाधिकम् ॥

4.39

हुत्वाग्नौ समिधस् तिस्रौ शिवोमास्कन्दनामभिः पश्चाद् दद्यात् तिलान्नानि होमयीत यथाक्रमम् ॥

4.40

पलाशाअङ्कुरजारिष्टपालाल्यः(?) समिधः शुभाः पृषदाज्यप्लुता हुत्वा शृणु यत् फलम् आप्नुयात् ॥

4.41

पलाशाङ्कुरसंख्यानां यावद् अग्नौ हुतं भवेत् तावत्कल्पान् महाभोगैः शिवलोके महीयते ॥

4.42

तल्लक्ष्यमध्यसंभूतं हुत्वाग्नौ समिधः शुभाः कल्पार्धसंमितं कालं भोगान् भुङ्क्ते शिवे पुरे ॥

4.43

शमीसमित्फलं देयम् अब्दान् अपि च लक्षकम् शम्यर्धफलवच्छेषाः समिधः क्षीरवृक्षजाः ॥

4.44

तिलसंख्यांस् तिलान् हुत्वा ह्य् आज्याक्ता(?) यावती भवेत् तावत् स वर्षलक्षांस् तु भोगान् भुङ्क्ते शिवे पुरे ॥

4.45

यावत् सुरौषधीरज्ञस्(?) तिलतुल्यफलं स्मृतम् इतरेभ्यस् तिलेभ्यश् च कृष्णानां द्विगुणं फलम् ॥

4.46

लाजाक्षताः सगोधूमाः वर्षलक्षफलप्रदाः दशसाहस्रिका ज्ञेयाः शेषाः स्युर् बीजजातयः ॥

4.47

पलाशेन्धनजे वह्नौ होमस्य द्विगुणं फलम् क्षीरवृक्षसमृद्धे ऽग्नौ फलं सार्धार्धिकं भवेत् ॥

4.48

असमिद्धे सधूमे च होमकर्म निरर्थकम् अन्धश् च जायमानः स्याद् दारिद्र्योपहतस् तथा ॥

4.49

न च कण्टकिभिर् वृक्षैर् अग्निं प्रज्वाल्य होमयेत् शुष्कैर् नवैः प्रशस्तैश् च काष्ठैर् अग्निं समिन्धयेत् ॥

4.50

एवम् आज्याहुतिं हुत्वा शिवलोकम् अवाप्नुयात् तत्र कल्पशतं भोगान् भुङ्क्ते दिव्यान् यथेप्सितान् ॥

4.51

स्रुचैकाहितमात्रेण व्रतस्यापूरितेन च याहुतिर् दीयते वह्नौ सा पूर्णाहुतिर् उच्यते ॥

4.52

एकां पूर्णाहुतिं हुत्वा शिवेन शिवभावितः सर्वकामम् अवाप्नोति शिवलोके व्यवस्थितः ॥

4.53

अशेषकुलजैर् सार्धं स भृत्यैः परिवारितः आभूतसंप्लवं यावद् भोगान् भुङ्क्ते यथेप्सितान् ॥

4.54

ततश् च प्रलये प्राप्ते संप्राप्य ज्ञानम् उत्तमम् प्रसादाद् ईश्वरस्यैव मुच्यते भवसागरात् ॥

4.55

शिवपूर्णाहुतिं वह्नौ पतन्तीं यः प्रपश्यति सो ऽपि पापरि नरः सर्वैर् मुक्तः शिवपुरं व्रजेत् ॥

4.56

शिवाग्निधूमसंस्पृष्टा जीवाः सर्वे चराचराः ते ऽपि पापविनिर्मुक्ताः स्वर्गं यान्ति न संशयः ॥

4.57

शिवयज्ञमहावेद्या जायते ये न सन्ति वा ते ऽपि यान्ति शिवस्थानं जीवाः स्थावरजङ्गमाः ॥

4.58

पूर्णाहुतिं घृताभावे क्षीरतैलेन कल्पयेत् होमयेद् अतसीतैलं तिलतैलं विना नरः ॥

4.59

सर्षपेङ्गुडिकाशाम्रकरञ्जमधुकाक्षजम् प्रियङ्गुबिल्वपैप्पल्यनालिकेरसमुद्भवम्(?) ॥

4.60

इत्य् एवम् आदिकं तैलम् आज्याभावे प्रकल्पयेत् दूर्वया बिल्वपत्त्रैर् वा समिधः संप्रकीर्तिताः ॥

4.61

अन्नार्थं होमयेत् क्षीरं दधि मूलफलानि वा तिलार्थं तण्डुलैः कुर्याद् दर्भार्थं हरितैस् तृणैः ॥

4.62

परिधीनाम् अभावेन शरैर् वंशैश् च कल्पयेत् इन्धनानाम् अभावेन दीपयेत् तृणगोमयैः ॥

4.63

गोमयानाम् अभावेन महत्य् अम्भसि होमयेत् अपाम् असंभवे होमं भूमिभागे मनोहरे ॥

4.64

विप्रस्य दक्षिणे पाणाव् अश्वत्थे तदभावतः छागस्य दक्षिणे कर्णे कुशमूले च होमयेत् ॥

4.65

स्वात्माग्नौ होमयेत् प्राज्ञः सर्वाग्नीनाम् असंभवे अभावे न त्यजेत् कर्म कर्मयोगविधौ स्थितः ॥

4.66

आपत्काले ऽपि यः कुर्याच् छिवाग्नेर् मनसार्चनम् स मोहकञ्चुकं त्यक्त्वा परां शान्तिम् अवाप्नुयात् ॥

4.67

प्राणाग्निहोत्रं कुर्वन्ति परमं शिवयोगिनः बाह्यकर्मविनिर्मुक्ता ज्ञानध्यानसमाकुलाः ॥

4.68

॥ इति शिवोपनिषदि शान्तिगृहाग्निकार्याध्यायश् चतुर्थः ॥

5.1

अथाग्नेयं महास्नानम् अलक्ष्मीमलनाशनम् सर्वपापहरं दिव्यं तपः श्रीकीर्तिवर्धनम् ॥

5.2

अग्निरूपेण रुद्रेण स्वतेजः परमं बलम् भूतिरूपं समुद्गीर्णं विशुद्धं दुरितापहम् ॥

5.3

यक्षरक्षःपिशाचानां ध्वंसनं मन्त्रसत्कृतम् रक्षार्थं बालरूपाणां सूतिकानां गृहेषु च ॥

5.4

यश् च भुङ्क्ते द्विजः कृत्वा [अ]न्नस्य वा परिधित्रयम्(?) अपि शूद्रस्य पङ्क्तिस्थः पङ्क्तिदोषैर् न लिप्यते ॥

5.5

आहारम् अर्धभुक्तं च कीटकेशादिदूषितम् तावन्मात्रं समुद्धृत्य भूतिस्पृष्टं विशुद्ध्यति ॥

5.6

आरण्यं गोमयकृतं करीषं वा प्रशस्यते शर्करापांसुनिर्मुक्तम् अभावे काष्ठभस्मना ॥

5.7

स्वगृहाश्रमवल्लिभ्यः कुलालालयभस्मना गोमयेषु च दग्धेषु हीष्टकानि च येषु च ॥

5.8

सर्वत्र विद्यते भस्म दुःखापार्जनरक्षणम् (दुःखोपार्) शङ्खकुन्देन्दुवर्णाभम् आदद्याज् जन्तुवर्जितम् ॥

5.9

भस्मानीय प्रयत्नेन तद् रक्षेद् यत्नवांस् तथा मार्जारमूषिकाद्यैश् च नोपहन्येत तद् यथा ॥

5.10

पञ्चदोषविनिर्मुक्तं गुणपञ्चकसंयुतम् शिवैकादशिकाजप्तं शिवभस्म प्रकीर्तितम् ॥

5.11

जातिकारुकवाक्कायस्थानदुष्टं च पञ्चमम् पापघ्नं शांकरं रक्षापवित्रं योगदं गुणाः(?) ॥

5.12

शिवव्रतस्य शान्तस्य भासकत्वाच् छुभस्य च भक्षणात् सर्वपापानां भस्मेति परिकीर्तितम् ॥

5.13

भस्मस्नानं शिवस्नानं वारुणाद् अधिकं स्मृतम् जन्तुशैवालनिर्मुक्तम् आग्नेयं पङ्कवर्जितम् ॥

5.14

अपवित्रं भवेत् तोयं निशि पूर्वम् अनाहृतम् नदीतडागवापिषु गिरिप्रस्रवणेषु च ॥

5.15

स्नानं साधारणं प्रोक्तं वारुणं सर्वदेहिनाम् असाधारणम् एवोक्तं भस्मस्नानं द्विजन्मनाम् ॥

5.16

त्रिकालं वारुणस्नानाद् अनारोग्यं प्रजायते आग्नेयं रोगशमनम् एतस्माद् सार्वकामिकम् ॥

5.17

संध्यात्रये ऽर्धरात्रे च भुक्त्वा चान्नविरेचने शिवयोग्य् आचरेत् स्नानम् उच्चारादिक्रियासु च ॥

5.18

भस्मास्तृते महीभागे समे जन्तुविवर्जिते ध्यायमानः शिवं योगी रजन्यन्तं शयीत च ॥

5.19

एकरात्रोषितस्यापि या गतिर् भस्मशायिनः न सा शक्या गृहस्थेन प्राप्तुं यज्ञशतैर् अपि ॥

5.20

गृहस्थस् त्र्यायुषोंकारैः स्नानं कुर्यात् त्रिपुण्ड्रकैः यतिः सार्वाङ्गिकं स्नानम् आपादतलमस्तकात् ॥

5.21

शिवभक्तस् त्रिधा वेद्यां भस्मस्नानफलं लभेत् हृदि मूर्ध्नि ललाटे च शूद्रः शिवगृहाश्रमी ॥

5.22

गणाः प्रव्रजिताः शान्ताः भूतिम् आलभ्य पञ्चधा शिरोललाटे हृद्बाह्वोर् भस्मस्नानफलं लभेत् ॥

5.23

संवत्सरं तदर्धं वा चतुर्दश्यष्टमीषु च यः कुर्याद् भस्मना स्नानं तस्य पुण्यफलं शृनु ॥

5.24

शिवभस्मनि यावन्तः समेताः परमाणवः तावद्वर्षसहस्राणि शिवलोके महीयते ॥

5.25

एकविंशकुलोपेतः पत्नीपुत्रादिसंयुतः मित्रस्वजनभृत्यैश् च समस्तैः परिवारितः ॥

5.26

तत्र भुक्त्वा महाभोगान् इच्छया सार्वकामिकान् ज्ञानयोगं समासाद्य प्रलये मुक्तिम् आप्नुयात् ॥

5.27

भस्म भस्मान्तिकं येन गृहीतं नैष्ठिकव्रतम्(?) अनेन वै स देहेन रुद्रश् चङ्क्रमते क्षितौ ॥

5.28

भस्मस्नानरतं शान्तं ये नमन्ति दिने दिने ते सर्वपापनिर्मुक्ता नरा यान्ति शिवं पुरम् ॥

5.29

इत्य् एतत् परमं स्नानम् आग्नेयं शिवनिर्मितम् त्रिसंध्यम् आचरेन् नित्यं जापी योगम् अवाप्नुयात् ॥

5.30

भस्मानीय प्रदद्याद् यः स्नानार्थं शिवयोगिने कल्पं शिवपुरे भोगान् भुक्त्वान्ते स्याद् द्विजोत्तमः ॥

5.31

आग्नेयं वारुणं मान्त्रं वायव्यं त्व् ऐन्द्रपञ्चमम् मानसं शान्तितोयं च ज्ञानस्नानं तथाष्टमम् ॥

5.32

आग्नेयं रुद्रमन्त्रेण भस्मस्नानम् अनुत्तमम् अम्भसा वारुणं स्नानम् कार्यं वारुणमूर्तिना ॥

5.33

मूर्धानं पाणिनालभ्य शिवैकादशिकां जपेत् ध्यायमानः शिवं शान्तम् मन्त्रस्नानं परं स्मृतम् ॥

5.34

गवां खुरपुटोत्खातपवनोद्धूतरेणुना कार्यं वायव्यकं स्नानम् मन्त्रेण मरुदात्मना ॥

5.35

व्यभ्रे ऽर्के वर्षति स्नानं कुर्याद् ऐन्द्रीं दिशं स्थितः आकाशमूर्तिमन्त्रेण तद् ऐन्द्रम् इति कीर्तितम् ॥

5.36

उदकं पाणिना गृह्य सर्वतीर्थानि संस्मरेत् अभ्युक्षयेच् छिरस् तेन स्नानं मानसम् उच्यते ॥

5.37

पृथिव्यां यानि तीर्थानि सरांस्य् आयतनानि च तेषु स्नातस्य यत् पुण्यं तत् पुण्यं क्षान्तिवारिणा ॥

5.38

न तथा शुध्यते तीर्थैस् तपोभिर् वा महाध्वरैः पुरुषः सर्वदानैश् च यथा क्षान्त्या विशुद्ध्यति ॥

5.39

आक्रुष्टस् ताडितस् तस्माद् अधिक्षिप्तस् तिरस्कृत क्षमेद् अक्षममानानां स्वर्गमोक्षजिगीषया ॥

5.40

यैव ब्रह्मविदां प्राप्तिर् यैव प्राप्तिस् तपस्विनाम् यैव योगाभियुक्तानां गतिः सैव क्षमावताम् ॥

5.41

ज्ञानामलाम्भसा स्नातः सर्वदैव मुनिः शुचिः निर्मलः सुविशुद्धश् च विज्ञेयः सूर्यरश्मिवत् ॥

5.42

मेध्यामेध्यरसं यद्वद् अपि वत्स विना करैः नैव लिप्यति तद् दोषैस् तद्वज् ज्ञानी सुनिर्मलः ॥

5.43

एषाम् एकतमे स्नातः शुद्धभावः शिवं व्रजेत् अशुद्धभावः स्नातो ऽपि पूजयन्न् आप्नुयात् फलम् ॥

5.44

जलं मन्त्रं दया दानं सत्यम् इन्द्रियसंयमः ज्ञानं भावात्मशुद्धिश् च शौचम् अष्टविधं श्रुतम् ॥

5.45

अङ्गुष्ठतलमूले च ब्राह्मं तीर्थम् अवस्थितम् तेनाचम्य भवेच् छुद्धः शिवमन्त्रेण भावितः ॥

5.46

यद् अधः कन्यकायाश् च तत् तीर्थं दैवम् उच्यते तीर्थं प्रदेशिनीमूले पित्र्यं पितृविधोदयम्(?) ॥

5.47

मध्यमाङ्गुलिमध्येन तीर्थम् आरिषम् उच्यते करपुष्करमध्ये तु शिवतीर्थं प्रतिष्ठितम् ॥

5.48

वामपाणितले तीर्थम् औमम् नाम प्रकीर्तितम् शिवोमातीर्थसंयोगात् कुर्यात् स्नानाभिषेचनम् ॥

5.49

देवान् दैवेन तीर्थेन तर्पयेद् अकृताम्भसा उद्धृत्य दक्षिणं पाणिम् उपवीती सदा बुधः ॥

5.50

प्राचीनावीतिना कार्यं पितृणां तिलवारिणा तर्पणं सर्वभूतानाम् आरिषेण निवीतिना ॥

5.51

सव्यस्कन्धे यदा सूत्रम् उपवीत्य् उच्यते तदा प्राचीनावीत्य् असव्येन निवीती कण्ठसंस्थिते ॥

5.52

पितृणां तर्पणं कृत्वा सूर्यायार्घ्यं प्रकल्पयेत् उपस्थाय ततः सूर्यं यजेच् छिवम् अनन्तरम् ॥

5.53

॥ इति शिवोपनिषदि शिव-भस्म-स्नानाध्यायः पञ्चमः ॥

6.1

अथ भक्त्या शिवं पूज्य नैवेद्यम् उपकल्पयेत् यद् अन्नम् आत्मनाश्नीयात् तस्याग्रे विनिवेदयेत् ॥

6.2

यः कृत्वा भक्ष्यभोज्यानि यत्नेन विनिवेदयेत् शिवाय स शिवे लोके कल्पकोटिं प्रमोदते ॥

6.3

यः पक्वं श्रीफलं दद्याच् छिवाय विनिवेदयेत् गुरोर् वा होमयेद् वापि तस्य पुण्यफलं शृणु ॥

6.4

श्रीमद्भिः स महायानैर् भोगान् भुङ्क्ते शिवे पुरे वर्षाणाम् अयुतं साग्रं तदन्ते श्रीपतिर् भवेत् ॥

6.5

कपित्थम् एकं यः पक्वम् ईश्वराय निवेदयेत् वर्षलक्षं महाभोगैः शिवलोके महीयते ॥

6.6

एकम् आम्रफलं पक्वं यः शम्भोर् विनिवेदयेत् वर्षाणाम् युतं भोगैः क्रीडते स शिवे पुरे ॥

6.7

एकं वटफलं पक्वं यः शिवाय निवेदयेत् वर्षलक्षं महाभोगैः शिवलोके महीयते ॥

6.8

यः पक्वं दाडिमं चैकं दद्याद् विकसितं नवम् शिवाय गुरवे वापि तस्य पुण्यफलं शृणु ॥

6.9

यावत् तद्बीजसंख्यानं शोभनं परिकीर्तितम् तावदष्टायुतान्य् उच्चैः शिवलोके महीयते ॥

6.10

द्राक्षाफलानि पक्वानि यः शिवाय निवेदयेत् भक्त्या वा शिवयोगिभ्यस् तस्य पुण्यफलं शृणु ॥

6.11

यावत् तत्फलसंख्यानम् उभयोर् विनिवेदितम् तावद्युगसहस्राणि रुद्रलोके महीयते ॥

6.12

द्राक्षाफलेषु यत् पुण्यं तत् खर्जूरफलेषु च तद् एव राजवृक्षेषु पारावतफलेषु च ॥

6.13

यो नारङ्गफलं पक्वं विनिवेद्य महेश्वरे अष्टलक्षं महाभोगैः कृडते स शिवे पुरे ॥

6.14

बीजपूरेषु तस्यार्धं तदर्धं लिकुचेषु च जम्बूफलेषु यत् पुण्यं तत् पुण्यं तिन्दुकेषु च ॥

6.15

पनसं नारिकेलं वा शिवाय विनिवेदयेत् वर्षलक्षं महाभोगैः शिवलोके महीयते ॥

6.16

पुरुषं च प्रियालं च मधूककुसुमानि च जम्बूफलानि पक्वानि वैकङ्कतफलानि च ॥

6.17

निवेद्य भक्त्या शर्वाय प्रत्येकं तु फले फले दशवर्षसहस्राणि रुद्रलोके महीयते ॥

6.18

क्षीरिकायाः फलं पक्वं यः शिवाय निवेदयेत् वर्षलक्षं महाभोगैर् मोदते स शिवे पुरे ॥

6.19

वालुकात्रपुसादीनि यः फलानि निवेदयेत् शिवाय गुरवे वापि पक्वं च करमर्दकम् ॥

6.20

दशवर्षसहस्राणि रुद्रलोके महीयते बदराणि सुपक्वानि तिन्तिडीकफलानि च ॥

6.21

दर्शनीयानि पक्वानि ह्य् आमलक्याः फलानि च एवम् आदीनि चान्यानि शाकमूलफलानि च ॥

6.22

निवेदयति शर्वाय शृणु यत् फलम् आप्नुयात् एकैकस्मिन् फले भोगान् प्राप्नुयाद् अनुपूर्वशः ॥

6.23

पञ्चवर्षसहस्राणि रुद्रलोके महीयते गोधूमचन्दकाद्यानि सुकृतं सक्तुभर्जितम् ॥

6.24

निवेदयीत शर्वाय तस्य पुण्यफलं शृणु यावत् तद्बीजसंख्यानं शुभं भ्रष्टं निवेदयेत् ॥

6.25

तावद्वर्षसहस्राणि रुद्रलोके महीयते यः पक्वानीक्षुदण्डानि शिवाय विनिवेदयेत् ॥

6.26

गुरवे वापि तद् भक्त्या तस्य पुण्यफलं शृणु इक्षुपर्णानि चैकैकं वर्षलोकं प्रमोदते ॥

6.27

साकं शिवपुरे भोगैः पौण्ड्रं पञ्चगुणं फलम् निवेद्य परमेशाय शुक्तिमात्ररसस्य तु ॥

6.28

वर्षकोटिं महाभोगैः शिवलोके महीयते निवेद्य फाणितं शुद्धं शिवाय गुरवे ऽपि वा ॥

6.29

रसात् सहस्रगुणितं फलं प्राप्नोति मानवः गुडस्य फलम् एकं यः शिवाय विनिवेदयेत् ॥

6.30

अम्बकोटिं शिवे लोके महाभोगैः प्रमोदते खण्डस्य पलनैवेद्यं गुडाच् छतगुणं फलम् ॥

6.31

खण्डात् सहस्रगुणितं शर्कराया निवेदने मत्सण्डिकां महाशुद्धां शंकराय निवेदयेत् ॥

6.32

कल्पकोटिं नरः साग्रं शिवलोके महीयते परिशुद्धं भृष्टम् आज्यं सिद्धं चैव सुसंस्कृतम् ॥

6.33

मासं निवेद्य शर्वाय शृणु यत् फलम् आप्नुयात् अशेषफलदानेन यत् पुण्यं परिकीर्तितम् ॥

6.34

तत् पुण्यं प्राप्नुयात् सर्वं महादाननिवेदने पनसानि च दिव्यानि स्वादूनि सुरभीणि च ॥

6.35

निवेदयेत् तु शर्वाय तस्य पुण्यफलं शृणु कल्पकोटिं नरः साग्रं शिवलोके व्यवस्थितः ॥

6.36

पिबन् शिवामृतं दिव्यं महाभोगैः प्रमोदते दिने दिने च यस् त्व् आपं वस्त्रपूतं समाचरेत् ॥

6.37

सुखाय शिवभक्तेभ्यस् तस्य पुण्यफलं शृणु महासरांसि यः कुर्याद् भवेत् पुण्यं शिवाग्रतः ॥

6.38

तत् पुण्यं सकलं प्राप्य शिवलोके महीयते यद् इष्टम् आत्मनः किंचिद् अन्नपानफलादिकम् ॥

6.39

तत् तच् छिवाय देयं स्याद् उत्तमं भोगम् इच्छता न शिवः परिपूर्णत्वात् किंचिद् अश्नाति कस्यचित् ॥

6.40

किन्त्व् ईश्वरनिभं कृत्वा सर्वम् आत्मनि दीयते न रोहति यथा बीजं स्वस्थम् आश्रयवर्जितम् ॥

6.41

पुण्यबीजं तथा सूक्ष्मं निष्फलं स्यान् निराश्रयम् सुक्षेत्रेषु यथा बीजम् उप्तं भवति सत्फलम् ॥

6.42

अल्पम् अप्य् अक्षयं तद्वत् पुण्यं शिवसमाश्रयात् तस्माद् ईश्वरम् उद्दिश्य यद् यद् आत्मनि रोचते ॥

6.43

तत् तद् ईश्वरभक्तेभ्यः प्रदातव्यं फलार्थिना यः शिवाय गुरोर् वापि रचयेन् मणिभूमिकम् ॥

6.44

नैवेद्य भोजनार्थं यः पत्त्रैः पुष्पैश् च शोभनम् यावत् तत् पत्त्रपुष्पाणां परिसंख्या विधीयते ॥

6.45

तावद्वर्षसहस्राणि सुरलोके महीयते पलाशकदलीपद्मपत्त्राणि च विशेषतः ॥

6.46

दत्त्वा शिवाय गुरवे शृणु यत् फलम् आप्नुयात् यावत् तत्पत्त्रसंख्यानम् ईश्वराय निवेदितम् ॥

6.47

तावदब्दायुतानां स लोके भोगान् अवाप्नुयात् यावत् ताम्बुलपत्त्राणि पूगांश् च विनिवेदयेत् ॥

6.48

तावन्ति वर्षलक्षाणि शिवलोके महीयते यच् छुद्धं शङ्खचूर्णं वा गुरवे विनिवेदयेत् ॥

6.49

ताम्बूलयोगसिद्ध्यर्थं तस्य पुण्यफलं शृणु यावत् ताम्बूलपत्त्राणि चूर्णमानेन भक्षयेत् ॥

6.50

तावद्वर्षसहस्राणि रुद्रलोके महीयते जातीफलं सकङ्कोलं लताकस्तूरिकोत्पलम् ॥

6.51

इत्य् एतानि सुगन्धीनि फलानि विनिवेदयेत् फले फले महाभोगैर् वर्षलक्षं तु यत्नतः ॥

6.52

कामिकेन विमानेन क्रीडते स शिवे पुरे त्रुटिमात्रप्रमाणेन कर्पूरस्य शिवे गुरौ ॥

6.53

वर्षकोटिं महाभोगैः शिवलोके महीयते पूगताम्बूलपत्राणाम् आधारं यो निवेदयेत् ॥

6.54

वर्षकोट्यष्टकं भोगैः शिवलोके महीयते यश् चूएणाधारसत्पात्रं कस्यापि विनिवेदयेत् ॥

6.55

मोदते स शिवे लोके वर्षकोटीश् चतुर्दश मृत्काष्ठवंशखण्डानि यः प्रदद्याच् छिवाश्रमे ॥

6.56

प्राप्नुयाद् विपुलान् भोगान् दिव्याञ् छिवपुरे नरः माणिक्यं कलशं पात्रीं स्थाल्यादीन् भाण्डसंपुटान् ॥

6.57

दत्त्वा शिवाग्रजस् तेभ्यः शिवलोके महीयते तोयाधारपिधानानि मृद्वस्त्रतरुजानि वा ॥

6.58

वंशालाबुसमुत्थानि दत्त्वाप्नोति शिवं पुरम् पञ्चसंमार्जनीतोयं गोमयाञ्जनकर्पटान् ॥

6.59

मृत्कुम्भपीटिकां दद्याद् भोगाञ् छिवपुरे लभेत् यः पुष्पधूपगन्धानां दधिक्षीरघृताम्भसाम् ॥

6.60

दद्याद् आधारपात्राणि शिवलोके स गच्छति वंशतालादिसंभूतं पुष्पाधारकरण्डकम् ॥

6.61

इत्य् एवमाद्यान् यो दद्याच् छिवलोकम् अवाप्नुयात् यः स्रुक्स्रुवादिपात्राणि होमार्थं विनिवेदयेत् ॥

6.62

वर्षकोटिं महाभागैः शिवलोके महीयते यः सर्वधातुसंयुक्तं दद्याल् लवणपर्वतम् ॥

6.63

शिवाय गुरवे वापि तस्य पुण्यफलं शृणु कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥

6.64

स गोत्रभृत्यसंयुक्तो वसेच् छिवपुरे नरः विमानयानैः श्रीमद्भिः सर्वकामसमन्वितैः ॥

6.65

भोगान् भुक्त्वा तु विपुलांस् तदन्ते स महीपतिः मनःशिलां हरीतालं राजपट्टं च हिङ्गुलम् ॥

6.66

गैरिकं मणिदन्तं च हेमतोयं तथाष्टमम् यश् च तं पर्वतवरं शालितण्डुलकल्पितम् ॥

6.67

शिवायगुरवे वापि तस्य पुण्यफलं शृणु कल्पकोटिशतं साग्रं भोगान् भुङ्क्ते शिवे पुरे ॥

6.68

यः सर्वधान्यशिखरैर् उपेतं यवपर्वतम् घृततैलनदीयुक्तं तस्य पुण्यफलं शृणु ॥

6.69

कल्पकोटिशतं साग्रं भोगान् भुङ्क्ते शिवे पुरे समस्तकुलजैः सार्धं तस्यान्ते स महीपतिः ॥

6.70

तिलधेनुं प्रदद्याद् यः कृत्वा कृष्णाजिने नरः कपिलायाः प्रदानस्य यत् फलं तद् अवाप्नुयात् ॥

6.71

घृतधेनुं नरः कृत्वा कांस्यपात्रे सकाञ्चनान् निवेद्य गोप्रदानस्य समग्रं फलम् आप्नुयात् ॥

6.72

द्वीपिचर्मणि यः स्थाप्य प्रदद्याल् लवणाढकम् अशेषरसदानस्य यत् पुण्यं तद् अवाप्नुयात् ॥

6.73

मरिचाढेन कुर्वीत(?) मारीचं नाम पर्वतम् दद्याद् यज् जीरकं पूर्वम् आग्नेयं हिङ्गुम् उत्तमम् ॥

6.74

दक्षिणे गुडशुण्ठीं च नैर्ऋते नागकेसरम् पिप्पलीं पश्चिमे दद्याद् वायव्ये कृष्णजीरकम् ॥

6.75

कौबेर्याम् अजमोदं च त्वगेलाश् चेशदैवते कुस्तुम्बर्याः प्रदेयाः स्युर् बहिः प्राकारतः स्थिताः ॥

6.76

ककुभाम् अन्तरालेषु समन्तात् सैन्धवं न्यसेत् सपुष्पाक्षततोयेन शिवाय विनिवेदयेत् ॥

6.77

यावत् तद्वीपसंख्यानं सर्वम् एकत्र पर्वते तावद्वर्षशताद् ऊर्ध्वं भोगान् भुङ्क्ते शिवे पुरे ॥

6.78

कूश्माण्डं मध्यतः स्थाप्य कालिङ्गं पूर्वतो न्यसेत् दक्षिणे क्षीरतुम्बीं तु वृन्ताकं पश्चिमे न्यसेत् ॥

6.79

पटीसान्य् उत्तरे स्थाप्य कर्कटीम् ईशदैवते न्यसेद् गजपटोलांश् च मधुरान् वह्निदैवते ॥

6.80

कारवेल्लांश् च नैर्ऋत्यां वायव्यां निम्बकं फलम् उच्चावचानि चान्यानि फलानि स्थापयेद् बहिः ॥

6.81

अभ्यर्च्य पुष्पधूपैश् च समन्तात् फलपर्वतम् शिवाय गुरवे वापि प्रणिपत्य निवेदयेत् ॥

6.82

यावत् तत्फलसंख्यानं तद्दीपानां च मध्यतः तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥

6.83

मूलकं मध्यतः स्थाप्य तत्पूर्वे वालमूलकम् आग्नेय्यां वास्तुकं स्थाप्य याम्यायां क्षारवास्तुकम् ॥

6.84

पालक्यं नैरृते स्थाप्य सुमुखं पश्चिमे न्यसेत् कुहद्रकं च वायव्याम् उत्तरे वापि तालिकीम् ॥

6.85

कुसुम्भशाकम् ऐशान्यां सर्वशाकानि तद्बहिः पूर्वक्रमेण विन्यस्य शिवाय विनिवेदयेत् ॥

6.86

यावत् तन्मूलनालानां पत्रसंख्या च कीर्तिता तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥

6.87

दत्त्वा लभेन् महाभोगान् गुग्गुल्वद्रेः पलद्वयम् वर्षकोटिद्वयं स्वर्गे द्विगुणं गुडमिश्रितैः ॥

6.88

गुडार्द्रकं सलवणम् आम्रमञ्जरिसंयुतम् निवेद्य गुरवे भक्त्या सौभाग्यं परमं लभेत् ॥

6.89

हस्तारोप्येण वा कृत्वा महारत्नान्वितां महीम् निवेदयित्वा शर्वाय शिवतुल्यः प्रजायते ॥

6.90

वज्रेन्द्रनीलवैडूर्यपद्मरागं समौक्तिकम् कीटपक्षं सुवर्णं च महारत्नानि सप्त वै ॥

6.91

यश् च सिंहासनं दद्यान् महारत्नान्वितं नृपः क्षुद्ररत्नैश् च विविधैस् तस्य पुण्यफलं शृणु ॥

6.92

कुलत्रिंशकसंयुक्तः सान्तःपुरपरिच्छदः समस्तभृत्यसंयुक्तः शिवलोके महीयते ॥

6.93

तत्र भुक्त्वा महाभोगान् शिवतुल्यपराक्रमः आमहाप्रलयं यावत् तदन्ते मुक्तिम् आप्नुयात् ॥

6.94

यदि चेद् राज्यम् आकङ्क्षेत् ततः सर्वसमाहितः सप्तद्वीपसमुद्रायाः क्षितेर् अधिपतिर् भवेत् ॥

6.95

जन्मकोटिसहस्राणि जन्मकोटिशतानि च राज्यं कृत्वा ततश् चान्ते पुनः शिवपुरं व्रजेत् ॥

6.96

एतद् एव फलं ज्ञेयं मकुटाभरणादिषु रत्नासनप्रदानेन पादुके विनिवेदयेत् ॥

6.97

दद्याद् यः केवलं वज्रं शुद्धं गोधूममात्रकम् शिवाय स शिवे लोके तिष्ठेद् आप्रलयं सुखी ॥

6.98

इन्द्रनीलप्रदानेन स वैडूर्यप्रदानतः मोदते विविधैर् भोगैः कल्पकोटिं शिवे पुरे ॥

6.99

मसूरमात्रम् अपि यः पद्मरागं सुशोभनम् निवेदयित्वा शर्वाय मोदते कालम् अक्षयम् ॥

6.100

निवेद्य मौक्तिकं स्वच्छम् एकभागैकमात्रकम् भोगैः शिवपुरे दिव्यैः कल्पकोटिं प्रमोदते ॥

6.101

कीटपक्षं महाशुद्धं निवेद्य यवमात्रकम् शिवायाद्यः शिवे लोके मोदते कालम् अक्षयम् ॥

6.102

हेम्ना कृत्वा च यः पुष्पम् अपि माषकमात्रकम् निवेदयित्वा शर्वाय वर्षकोटिं वसेद् दिवि ॥

6.103

क्षुद्ररत्नानि यो दद्याद् धेम्नि बद्धानि शम्भवे मोदते स शिवे लोके कल्पकोट्ययुतं नरः ॥

6.104

यथा यथा महारत्नं शोभनं च यथा यथा तथा तथा महत् पुण्यं ज्ञेयं तच् छिवदानतः ॥

6.105

भूमिभागे स()विस्तीऋणे जम्बूद्वीपं प्रकल्पयेत् अष्टावरणसंयुक्तं नगेन्द्राष्टकभूषितम् ॥

6.106

तन्मध्ये कारयेद् दिव्यं मेरुप्रासादम् उत्तमम् अनेकशिखराकीर्णम् अशेषामरसंयुतम् ॥

6.107

बहिः सुवर्णनिचितं सर्वरत्नोपशोभितम् चतुःप्रग्रीवकोपेतं चक्षुर्लिङ्गसमायुतम् ॥

6.108

चतुर्दिक्षु वनोपेतं चतुर्भिः संयुतैः शरैः चतुर्णां पुरयुक्तेन प्राकारेण च संयुतम् ॥

6.109

मेरुप्रासादम् इत्य् एवं हेमरत्नविभूषितम् यः कारयेद् वनोपेतं सो ऽनन्तफलम् आप्नुयात् ॥

6.110

भूम्यम्भःपरमाणूनां यथा संख्या न विद्यते शिवायतनपुण्यस्य तथा संख्या न विद्यते ॥

6.111

कुलत्रिंशकसंयुक्तः सर्वभृत्यसमन्वितः कलत्रपुत्रमित्रैश् च सर्वस्वजनसंयुतः ॥

6.112

आश्रितोपाश्रितैः सर्वैर् अशेषगणसंयुतः यथा शिवस् तथैवायं शर्वलोके स पूज्यते ॥

6.113

न च मानुष्यकं लोकम् आगच्छेत् कृपणं पुनः सर्वज्ञः परिपूर्णश् च मुक्तः स्वात्मनि तिष्ठति ॥

6.114

यः शिवाय वनं कृत्वा मुदाब्दसलिलोत्थितम्(?) तद् दण्डकोपशोभं च हस्ते कुर्वीत सर्वदा ॥

6.115

शोभयेद् भूतनाथं वा चन्द्रशालां क्वचित् क्वचित् वेदीं वाथाभ्यपद्यन्त प्रोन्नताः स्तम्भपङ्क्तयः ॥

6.116

शातकुम्भमयीं वापि सर्वलक्षणसंयुताम् ईश्वरप्रतिमां सौम्यां कारयेत् पुरुषोच्छ्रिताम् ॥

6.117

त्रिशूलसव्यहस्तां च वरदाभयदायिकां सव्यहस्ताक्षमालां च जटाकुसुमभूषिताम् ॥

6.118

पद्मसिंहासनासीनां वृषस्थां वा समुच्छ्रिताम् विमानस्थां रथस्थां वा वेदिस्थां वा प्रभान्विताम् ॥

6.119

सौम्यवक्त्रां करालां वा महाभैरवरूपिणीम् अत्युच्छ्रितां सुविस्तीर्णां नृत्यस्थां योगसंस्थिताम् ॥

6.120

कुर्याद् असंभवे हेम्नस् तारेण विमलेन च आरकूटमयीं वापि ताम्रमृच्छैलदारुजाम् ॥

6.121

अशेषकैः सरूपैश् च वर्णकैर् वा पटे लिखेत् कुड्ये वा फलके वापि भक्त्या वित्तानुसारतः ॥

6.122

एकां सपरिवारां वा पार्वतीं गणसंयुताम् प्रतीहारसमोपेतां(?) कुर्याद् एवाविकल्पतः ॥

6.123

पीठं वा कारयेद् रौप्यं ताम्रं पित्तलसंभवम् चतुर्मुखैकवक्त्रं वा बहिः काञ्चनसंस्कृतम् ॥

6.124

पृथक्पृथगनेकानि कारयित्वा मुखानि तु सौम्यभैरवरूपाणि शिवस्य बहुरूपिणः ॥

6.125

नानाभरणयुक्तानि हेमरौप्यकृतानि च शिवस्य रथयात्रायां तानि लोकस्य दर्शयेत् ॥

6.126

उक्तानि यानि पुण्यानि संक्षेपेण पृथक् पृथक् कृत्वैकेन ममैतेषाम् अक्षयं फलम् आप्नुयात् ॥

6.127

मातुः पितुः सहोपायैर्(?) दशभिर् दशभिः कुलैः कलत्रपुत्रमित्राद्यैर् भृत्यैर् युक्तः स बान्धवैः ॥

6.128

अयुतेन विमानानां सर्वकामयुतेन च भुङ्क्ते स्वयं महाभोगान् अन्ते मुक्तिम् अवाप्नुयात् ॥

6.129

मण्डपस्तम्भपर्यन्ते कीलयेद् दर्पणान्वितम् अभिषिच्य जना यस्मिन् पुजां कुवन्ति बिल्वकैः ॥

6.130

कालकालकृतिं कृत्वा कीलयेद् यः शिवाश्रमे सर्वलोकोपकाराय पूजयेच् च दिने दिने ॥

6.131

धूपवेलाप्रमाणार्थं कल्पयेद् यः शिवाश्रमे क्षरन्तीं पूर्यमाणां वा सदायामे घटीं नृपः ॥

6.132

एषाम् एकतमं पुण्यं कृत्वा पापविवर्जितः शिवलोके नरः प्राप्य सर्वज्ञः स सुखी भवेत् ॥

6.133

रथयात्रां प्रवक्ष्यामि शिवस्य परमात्मनः सर्वलोकहितार्थाय महाशिल्पिविनिर्मिताम् ॥

6.134

रथमध्ये समावेश्य यथा यष्टिं तु कीलयेत् यष्टेर् मध्ये स्थितं कार्यं विमानम् अतिशोभितम् ॥

6.135

पञ्चभौमं त्रिभौमं वा दृढवंशप्रकल्पितम् कर्मणा सुनिबद्धं च रज्जुभिश् च सुसंयुतम् ॥

6.136

पञ्चशालाण्डिकैर् युक्तं नानाभक्तिसमन्वितम् चित्रवर्णपरिच्छन्नं पटैर् वा वर्णकान्वितैः ॥

6.137

लम्बकैः सूत्रदाम्ना च घण्टाचामरभूषितम् बुद्बुदैर् अर्धचन्द्रैश् च दर्पणैश् च समुज्ज्वलम् ॥

6.138

कदल्यर्धध्वजैर् युक्तं महाच्छत्रं महाध्वजम् पुष्पमालापरिक्षिप्तं सर्वशोभासमन्वितम् ॥

6.139

महारथविमाने ऽस्मिन् स्थापयेद् गणसंयुतम् ईश्वरप्रतिमां हेम्नि प्रथमे पुरमण्डपे ॥

6.140

मुखत्रयं च बध्नीयाद् बहिः कुर्यात् तथाश्रितम् पुरे पुरे बहिर् दिक्षु गृहकेषु समाश्रितम् ॥

6.141

चतुष्कं शिववक्त्राणां संस्थाप्य प्रतिपूजयेत् दिनत्रयं प्रकुर्वीत स्नानम् अर्चनभोजनम् ॥

6.142

नृत्यक्रीडाप्रयोगेण गेयमङ्गलपाठकैः महावादित्रनिर्घोषैः पौषपूर्णिमपर्वणि ॥

6.143

भ्रामयेद् राजमार्गेण चतुर्थे ऽहनि तद्रथम् ततः स्वस्थानम् आनीय तच्छेषम् अपि वर्धयेत् ॥

6.144

अवधार्य जगद्धात्री प्रतिमाम् अवतारयेत् महाविमानयात्रैषा कर्तव्या पट्टके ऽपि वा ॥

6.145

वंशैर् नवैः सुपक्वैश् च कटं कुर्याद् भरक्षमम्(?) वृत्तं द्विगुणदीर्घं च चतुरश्रम् अधः समम् ॥

6.146

सर्वत्र चर्मणा बद्धं महायष्टिसमाश्रितम् मुखं बद्धं च कुर्वीत वंशमण्डलिना दृढम् ॥

6.147

कटे ऽस्मिंस् तानि वस्त्राणि स्थाप्य बध्नीत यत्नतः उपर्य् उपरि सर्वाणि तन्मध्ये प्रतिमां न्यसेत् ॥

6.148

वर्णकैः कुङ्कुमाद्यैश् च चित्रपुष्पैश् च पूजयेत् नानाभरणपूजाभिर् मुक्ताहारप्रलम्बिभिः ॥

6.149

रथस्य महतो मध्ये स्थाप्य पट्टद्वयं दृढम् अधरोत्तरभागेन मध्ये छिद्रसमन्वितम् ॥

6.150

कटियष्टेर् अधोभागं स्थाप्य छिद्रमयं शुभैः आबद्ध्य कीलयेद् यत्नाद् यष्ट्यर्धं च ध्वजाष्टकम् ॥

6.151

कटस्य पृष्टं सर्वत्र कारयेत् पटसंवृतम् तत्पटे च लिखेत् सोमं सगणं सवृषं शिवम् ॥

6.152

विचित्रपुष्पस्रग्दाम्ना समन्ताद् भूषयेत् कटम् रवकैः किङ्किणीजालैर् घण्टाचामरभूषितैः ॥

6.153

महापूजाविशेषैश् च कौतूहलसमन्वितम् वाद्यारम्भोपचारेण मार्गशोभां प्रकल्पयेत् ॥

6.154

तद् रथं भ्रामयेद् यत्नाद् राजमार्गेण सर्वतः ततः स्वाश्रमम् आनीय स्थापयेत् तत्समीपतः ॥

6.155

महाशब्दं ततः कुर्यात् तालत्रयसमन्वितम् ततस् तुष्णीं स्थिते लोके तच्छान्तिम् इह धारयेत् ॥

6.156

शिवं तु सर्वजगतः शिवं गोब्राह्मणस्य च शिवम् अस्तु नृपाणां च तद्भक्तानां जनस्य च ॥

6.157

राजा विजयम् आप्नोति पुत्रपौत्रैश् च वर्धताम् धर्मनिष्ठश् च भवतु प्रजानां च हिते रतः ॥

6.158

कालवर्षी तु पर्जन्यः सस्यसंपत्तिर् उत्तमा सुभिक्षात् क्षेमम् आप्नोति कार्यसिद्धिश् च जायताम् ॥

6.159

दोषाः प्रयान्तु नाशं च गुणाः स्थैर्यं भजन्तु वः बहुक्षीरयुता गावो हृष्टपुष्टा भवन्तु वः ॥

6.160

एवं शिवमहाशान्तिम् उच्चार्य जगतः क्रमात् अभिवर्ध्य ततः शेषम् ऐश्वरीं सार्वकामिकीम् ॥

6.161

शिवमालां समादाय सदासीपरिचारिकः फलैर् भक्षैश् च संयुक्तां गृह्य पात्रीं निवेशयेत् ॥

6.162

पात्रीं च धारयेन् मूर्ध्ना सोष्णीषां देवपुत्रकः अलंकृतः शुक्लवासा धार्मिकः सततं शुचिः ॥

6.163

ततश् च तां समुत्क्षिप्य पाणिना धारयेद् बुधः प्रब्रूयाद् अपरश् चात्र शिवधर्मस्य भाजकः ॥

6.164

तोयं यथा घटीसंस्थम् अजस्रं क्षरते तथा क्षरते सर्वलोकानां तद्वद् आयुर् अहर्निशम् ॥

6.165

यदा सर्वं परित्यज्य गन्तव्यम् अवशैर् ध्रुवम् तदा न दीयते कस्मात् पाथेयार्थम् इदं धनम् ॥

6.166

कलत्रपुत्रमित्राणि पिता माता च बान्धवाः तिष्ठन्ति न मृतस्यार्थे परलोके धनानि च ॥

6.167

नास्ति धर्मसमं मित्रं नास्ति धर्मसमः सखा यतः सर्वैः परित्यक्तं नरं धर्मो ऽनुगच्छति ॥

6.168

तस्माद् धर्मं समुद्दिश्य यः शेषाम् अभिवर्धयेत् समस्तपापनिर्मुक्तः शिवलोकं स गच्छति ॥

6.169

उपर्य् उपरि वित्तेन यः शेषाम् अभिवर्धयेत् तस्येयम् उत्तमा देया यतश् चान्या न वर्धते ॥

6.170

इत्य् एवं मध्यमां शेषां वर्धयेद् वा कनीयसीम् ततस् तेषां प्रदातव्या सर्वशोकस्य शान्तये ॥

6.171

येनोत्तमा गृहीता स्याच् शिवशेषा महीयसी प्रापणीया गृहं तस्य तथैव शिरसा वृता ॥

6.172

ध्वजच्छत्रविमानाद्यैर् महावादित्रनिःस्वनैः गृहद्वारं ततः प्राप्तम् अर्चयित्वा निवेशयेत् ॥

6.173

दद्याद् गोत्रकलत्राणां भृत्यानां स्वजनस्य च तर्पयेच् चानतान्(?) भक्त्या वादित्रध्वजवाहकान् ॥

6.174

एवम् आदीयते भक्त्या यः शिवस्योत्तमा गृहे शोभया राजमार्गेण तस्य धर्मफलं शृणु ॥

6.175

समस्तपापनिर्मुक्तः समस्तकुलसंयुतः शिवलोकम् अवाप्नोति सभृत्यपरिचारकः ॥

6.176

तत्र दिव्यैर् महाभोगैर् विमानैः सार्वकामिकैः कल्पानां क्रीडते कोटिम् अन्ते निर्वाणम् आप्नुयात् ॥

6.177

रथस्य यात्रां यः कुर्याद् इत्य् एवम् उपशोभया भक्षभोज्यप्रदानैश् च तत्फलं शृनु यत्नतः ॥

6.178

अशेषपापनिर्मुक्तः सर्वभृत्यसमन्वितः कुलत्रिंशकम् उद्धृत्य सुहृद्भिः स्वजनैः सह ॥

6.179

सर्वकामयुतैर् दिव्यैः स्वच्छन्दगमनालयैः महाविमानैः श्रीमद्भिर् दिव्यस्त्रीपरिवारितः ॥

6.180

इच्छया क्रीडते भोगैः कल्पकोटिं शिवे पुरे ज्ञानयोगं ततः प्राप्य संसाराद् अवमुच्यते ॥

6.181

शिवस्य रथयात्रायाम् उपवासपरः क्षमी पुरतः पृष्ठतो वापि गच्छंस् तस्य फलं शृणु ॥

6.182

अशेषपापनिर्मुक्तः शुद्धः शिवपुरं गतः महारथोपमैर् यानैः कल्पाशीतिं प्रमोदतेä ॥

6.183

ध्वजच्छत्रपताकाभिर् दीपदर्पणचामरैः धूपैर् वितानकलशैर् उपशोभा सहस्रशः ॥

6.184

गृहीत्वा याति पुरतः स्वेच्छया वा परेच्छया संपर्कात् कौतुकाल् लाभाच् छिवलोके व्रजन्ते ते ॥

6.185

शिवस्य रथयात्रां तु यः प्रपश्यति भक्तितः प्रसङ्गात् कौतुकाद् वापि ते ऽपि यान्ति शिवं पुरम् ॥

6.186

नानायत्नादिशेषान्ते नानाप्रेक्षणकानि च कुर्वीत रथयात्रायां रमते च विभूषिता ॥

6.187

ते भोगैर् विविधैर् दिव्यैः शिवासन्ना गणेश्वराः क्रीडन्ति रुद्रभवने कल्पानां विंशतीर् नराः ॥

6.188

महता ज्ञानसङ्घेन तस्माच् छिवरथेन च पृथक्जीवा मृता यान्ति शिवलोकं न संशयः ॥

6.189

श्रीपर्वते महाकाले वाराणस्यां महालये जल्पेश्वरे कुरुक्षेत्रे केदारे मण्डलेश्वरे ॥

6.190

गोकर्णे भद्रकर्णे च शङ्कुकर्णे स्थलेश्वरे भीमेश्वरे सुवर्णाक्षे कालञ्जरवने तथा ॥

6.191

एवम् आदिषु चान्येषु शिवक्षेत्रेषु ये मृताः जीवाश् चराचराः सर्वे शिवलोकं व्रजन्ति ते ॥

6.192

प्रयागं कामिकं तीर्थम् अविमुक्तं तु नैष्ठिकम् श्रीपर्वतं च विज्ञेयम् इहामुत्र च सिद्धिदम् ॥

6.193

प्रसङ्गेनापि यः पश्येद् अन्यत्र प्रस्थितः क्वचित् श्रीपर्वतं महापुण्यं सो ऽपि याति शिवं पुरम् ॥

6.194

व्रजेद् यः शिवतीर्थानि सर्वपापैः प्रमुच्यते पापयुक्तः शिवज्ञानं प्राप्य निर्वाणम् आप्नुयात् ॥

6.195

तीर्थस्थानेषु यः श्राद्धं शिवरात्रे प्रयत्नतः कल्पयित्वानुसारेण कालस्य विषुवस्य च ॥

6.196

तीर्थयात्रागतं शान्तं हाहाभूतम् अचेतनम् क्षुत्पिपासातुरं लोके पांसुपादं त्वरान्वितम् ॥

6.197

संतर्पयित्वा यत्नेन म्लानलक्ष्मीम् इवाम्बुभिः पाद्यासनप्रदानेन कस् तेन पुरुषः समः ॥

6.198

अश्नन्ति यावत् तत्पिण्डं तीर्थनिर्धूतकल्मषाः तावद्वर्षसहस्राणि तद्दातास् ते शिवे पुरे ॥

6.199

दद्याद् यः शिवसत्त्रार्थं महिषीं सुपयस्विनीम् मोदते स शिवे लोके युगकोटिशतं नरः ॥

6.200

आर्ताय शिवभक्ताय दद्याद् यः सुपयस्विनीम् अजाम् एकां सुपुष्टाङ्गीं तस्य पुण्यफलं शृणु ॥

6.201

यावत् तद्रोमसंख्यानं तत्प्रसूतिकुलेषु च तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥

6.202

मृदुरोमाञ्चितां कृष्णां निवेद्य गुरवे नरः रोम्णि रोम्णि सुवर्णस्य दत्तस्य फलम् आप्नुयात् ॥

6.203

गजाश्वरथसंयुक्तैर् विमानैः सार्वकामिकैः सानुगः क्रीडते भोगैः कल्पकोटिं शिवे पुरे ॥

6.204

निवेद्याश्वतरं पुष्टम् अदुष्टं गुरवे नरः संगतिं सोपकरणं भोगान् भुङ्क्ते शिवे पुरे ॥

6.205

दिव्याश्वयुक्तैः श्रीमद्भिर् विमानैः सार्वकामिकैः कोटिं कोटिं च कल्पानां तदन्ते स्यान् महीपतिः ॥

6.206

अपि योजनमात्राय शिबिकां परिकल्पयेत् गुरोः शान्तस्य दान्तस्य तस्य पुण्यफलं शृणु ॥

6.207

विमानानां सहस्रेण सर्वकामयुतेन च कल्पकोट्ययुतं साग्रं भोगान् भुङ्क्ते शिवे पुरे ॥

6.208

छागं मेषं मयूरं च कुक्कुटं शारिकां शुकम् बालक्रीडनकान् एतान् इत्य् आद्यान् अपरान् अपि ॥

6.209

निवेदयित्वा स्कन्दाय तत्सायुज्यम् अवाप्नुयात् भुक्त्वा तु विपुलान् भोगांस् तदन्ते स्याद् द्विजोत्तमः ॥

6.210

मुसलोलूखलाद्यानि गृहोपकरणानि च दद्याच् छिवगृहस्थेभ्यस् तस्य पूण्यफलं शृणु ॥

6.211

प्रत्येकं कल्पम् एकैकं गृहोपकरणैर् नरः अन्ते दिवि वसेद् भोगैस् तदन्ते च गृही भवेत् ॥

6.212

खर्जूरतालपत्त्रैर् वा चर्मणा वा सुकल्पितम् दत्त्वा कोट्यासनं वृत्तं शिवलोकम् अवाप्नुयात् ॥

6.213

प्रातर्नीहारवेलायां हेमन्ते शिवयोगिनाम् कृत्वा प्रतापनायाग्निं शिवलोके महीयते ॥

6.214

सूर्यायुतप्रभादीप्तैर् विमानैः सार्वकामिकैः कल्पकोटिशतं भोगान् भुक्त्वा स तु महीपतिः ॥

6.215

यः प्रान्तरं विदेशं वा गच्छन्तं शिवयोगिनम् भोजयीत यथाशक्त्या शिवलोके महीयते ॥

6.216

यश् छत्त्रं धारयेद् ग्रीष्मे गच्छते शिवयोगिने स मृतः पृथिवीं कृत्स्नाम् एकच्छत्त्राम् अवाप्नुयात् ॥

6.217

यः समुद्धरते मार्गे मात्रोपकरणासनम् शिवयोगप्रवृत्तस्य तस्य पुण्यफलं शृणु ॥

6.218

कल्पायुतं नरः साग्रं भुक्त्वा भोगाञ् छिवे पुरे तदन्ते प्राप्नुयाद् राज्यं सर्वैश्वर्यसमन्वितम् ॥

6.219

अभ्यङ्गोद्वर्तनं स्नानम् आर्तस्य शिवयोगिनः कृत्वाप्नोति महाभोगान् कल्पाञ् छिवपुरे नरः ॥

6.220

अपनीय समुच्छिष्टं भक्तितः शिवयोगिनाम् दशधेनुप्रदानस्य फलम् आप्नोति मानवः ॥

6.221

पञ्चगव्यसमं ज्ञेयम् उच्छिष्टं शिवयोगिनाम् तद् भुक्त्वा लभते शुद्धिं महतः पातकाद् अपि ॥

6.222

नारी च भुक्त्वा सत्पुत्रं कुलाधारं गुणान्वितम् राज्ययोग्यं धनाढ्यं च प्राप्नुयाद् धर्मतत्परम् ॥

6.223

यश् च यां शिवयज्ञाय गृहस्थः परिकल्पयेत् शिवभक्तो ऽस्य महतः परमं फलम् आप्नुयात् ॥

6.224

शिवोमां च प्रयत्नेन भक्त्याब्दं यो ऽनुपालयेत् गवां लक्षप्रदानस्य संपूर्णं फलम् आप्नुयात् ॥

6.225

प्रातः प्रदद्यात् सघृतं सुकृतं बालपिण्डकम् दूर्वां च बालवत्सानां(?) तस्य पुण्यफलं शृणु ॥

6.226

यावत् तद्बालवत्सानां पानाहारं प्रकल्पयेत् तावदष्टायुतान् पूर्वैर् भोगान् भुङ्क्ते शिवे पुरे ॥

6.227

विधवानाथवृद्धानां प्रदद्याद् यः प्रजीवनम् आभूतस्संप्लवं यावच् छिवलोके महीयते ॥

6.228

दद्याद् यः सर्वजन्तूनाम् आहारम् अनुयत्नतः त्रिः पृथ्वीं रत्नसंपूर्णां यद् दत्त्वा तत् फलं लभेत् ॥

6.229

विनयव्रतदानानि यानि सिद्धानि लोकतः तानि तेनैव विधिना शिवमन्त्रेण कल्पयेत् ॥

6.230

निवेदयीत रुद्राय रुद्राण्याः षण्मुखस्य च प्राप्नुयाद् विपुलान् भोगान् दिव्याञ् छिवपुरे नरः ॥

6.231

पुनर् यः कर्तरीं दद्यात् केशक्लेशापनुत्तये सर्वक्लेशविनिर्मुक्तः शिवलोके सुखी भवेत् ॥

6.232

नासिकाशोधनं दद्यात् संदंशं शिवयोगिने वर्षकोटिं महाभोगैः शिवलोके महीयते ॥

6.233

नखच्छेदनकं दत्त्वा शिवलोके महीयते वर्षलक्षं महाभोगैः शिवलोके महीयते ॥

6.234

दत्त्वाञ्जनशलाकां वा लोहाद्यां शिवयोगिने भोगाञ् छिवपुरे प्राप्य ज्ञानचक्षुर् अवाप्नुयात् ॥

6.235

कर्णशोधनकं दत्त्वा लोहाद्यं शिवयोगिने वर्षकोटिं महाभोगैः शिवलोके महीयते ॥

6.236

दद्याद् यः शिवभक्ताय सूचीं कौपीनशोधनीम् वर्षलक्षं स लक्षार्धं शिवलोके महीयते ॥

6.237

निवेद्य शिवयोगिभ्यः सूचिकं सूत्रसंयुतम् वर्षलक्षं महाभोगैः क्रीडते स शिवे पुरे ॥

6.238

दद्याद् यः शिवयोगिभ्यः सुकृतां पत्रवेधनीम् वर्षलक्षं महाभोगैः शिवलोके महीयते ॥

6.239

दद्याद् यः पुस्तकादीनां सर्वकार्यार्थकर्तृकाम् पञ्चलक्षं महाभोगैर् मोदते स शिवे पुरे ॥

6.240

शमीन्धनतृणादीनां दद्यात् तच्छेदनं च यः क्रीडते स शिवे लोके वर्षलक्षचतुष्टयम् ॥

6.241

शिवाश्रमोपभोगाय लोहोपकरणं महत् यः प्रदद्याग् कुठाराद्यं तस्य पुण्यफलं शृणु ॥

6.242

यावत् तत्फलसंख्यानं लोहोपकरणे भवेत् तावन्ति वर्षलक्षाणि शिवलोके महीयते ॥

6.243

शिवायतनवित्तानां रक्षार्थं यः प्रयच्छति धनुःखड्गायुधादीनि तस्य पुण्यफलं शृणु ॥

6.244

एकैकस्मिन् परिज्ञेयम् आयुधे चापि वै फलम् वर्षकोट्यष्टकं भोगैः शिवलोके महीयते ॥

6.245

यः स्वात्मभोगभृत्यर्थं कुसुमानि निवेदयेत् शिवाय गुरवे वापि तस्य पुण्यफलं शृणु ॥

6.246

यावद् अन्योऽन्यसंबन्धास् तस्यांशाः परिकीर्तिताः वर्षलक्षं स तावच् च शिवलोके प्रमोदते ॥

6.247

नष्टापहृतम् अन्विष्य पुनर् वित्तं निवेदयेत् शिवात्मकं शिवायैव तस्य पुण्यफलं शृणु ॥

6.248

यावच् छिवाय तद्वित्तं प्राङ् निवेद्य फलं स्मृतम् नष्टम् आनीय तद् भूयः पुण्यं शतगुणं लभेत् ॥

6.249

देवद्रव्यं हृतं नष्टम् अन्वेष्यम् अपि यत्नतः न प्राप्नोति तदा तस्य प्राप्नुयाद् द्विगुणं फलम् ॥

6.250

ताम्रकुम्भकटाहाद्यं यः शिवाय निवेदयेत् शिवात्मकं शिवायैव तस्य पुण्यफलं शृणु ॥

6.251

यावच् छिवाय तद् वित्तं प्राङ् निवेद्य फलं स्मृतम् नष्टम् आनीय तद् भूयः पुण्यं शतगुणं लभेत् ॥

6.252

स्नानसत्त्रोपभोगाय तस्य पुण्यफलं शृणु यावत् तत्फलसंख्यानं ताम्रोपकरणे स्थितम् ॥

6.253

पले पले वर्षकोटिं मोदते स शिवे पुरे यः पत्त्रपुष्पवस्तूनां दद्याद् आधारभाजनम् ॥

6.254

तद्वस्तुदातुर् यत् पुण्यं तत् पुण्यं सकलं भवेत् दत्त्वोपकरणं किंचिद् अपि यो वित्तम् अर्थिनाम् ॥

6.255

यद् वस्तु कुरुते तेन तत्प्रदानफलं लभेत् यः शौचपीतवस्त्राणि क्षाराद्यैः शिवयोगिनाम् ॥

6.256

स पापमलनिर्मुक्तः शिवलोकम् अवाप्नुयात् यः पुष्पपट्टसंयुक्तं पटगर्भं च कम्बलम् ॥

6.257

प्रदद्याच् छिवयोगिभ्यस् तस्य पुण्यफलं शृणु तेषां च वस्त्रतन्तूनां यावत्संख्या विधीयते ॥

6.258

तावद्वर्षसहस्राणि भोगान् भुङ्क्ते शिवे पुरे श्लक्ष्णवस्त्राणि शुक्लानि दद्याद् यः शिवयोगिने ॥

6.259

चित्रवस्त्राणि तद्भक्त्या तस्य पुण्यफलं शृणु यावत् तत्सूक्ष्मवस्त्राणां तन्तुसंख्या विधीयते ॥

6.260

तावद्युगानि संभोगैः शिवलोके महीयते शङ्खपात्रं तु विस्तीर्णं भाण्डं वापि सुशोभनम् ॥

6.261

प्रदद्याच् छिवयोगिभ्यस् तस्य पुण्यफलं शृणु दिव्यं विमानम् आरूढः सर्वकामसमन्वितम् ॥

6.262

कल्पकोट्ययुतं साग्रं शिवलोके महीयते शुक्त्यादीनि च पात्राणि शोभनान्य् अमलानि च ॥

6.263

निवेद्य शिवयोगिभ्यः शङ्खार्धेन फलं लभेत् स्फाटिकानां च पात्राणां शङ्खतुल्यफलं स्मृतम् ॥

6.264

शैलजानां तदर्धेन पात्राणां च तदर्धकम् तालखर्जूरपात्राणां वंशजानां निवेदने ॥

6.265

अन्येषाम् एवम् आदीनां पुण्यं वार्क्ष्यार्धसंमितम् वंशजार्धसमं पुण्यं फलपात्रनिवेदने ॥

6.266

नानापर्णपुटाणां च साराणां वा फलार्धकम् यस् ताम्रकांस्यपात्राणि शोव्हनान्य् अमलानि च ॥

6.267

स्नानभोजनपानार्थं दद्याद् यः शिवयोगिने ताम्रां कांसीं त्रिलोहीं वा यः प्रदद्यात् त्रिपादिकाम् ॥

6.268

भोजने भोजनाधारं गुरवे तत्फलं शृणु यावत् तत्पलसंख्यानं त्रिपाद्या भोजनेषु च ॥

6.269

तावद्युगसहस्राणि भोगान् भुङ्क्ते शिवे पुरे लोहं त्रिपादिकं दत्त्वा सत्कृत्वा शिवयोगिने ॥

6.270

दशकल्पान् महाभोगैर् नरः शिवपुरे वसेत् यः प्रदद्यात् त्रिविष्टम्भं भिक्षापात्रसमाश्रयम् ॥

6.271

वंशजं दारुजं वापि तस्य पुण्यफलं शृणु दिव्यस्त्रीभोगसंपन्नो विमाने महति स्थितः ॥

6.272

चतुर्युगसहस्रं तु भोगान् भुङ्क्ते शिवे पुरे भिक्षापात्रमुखाच्छादम् वस्त्रपर्णादिकल्पितम् ॥

6.273

दत्त्वा शिवपुरे भोगान् कल्पम् एकं वसेन् नरः संश्रयं यः प्रदद्याच् च भिक्षापात्रे कमण्डलौ ॥

6.274

कल्पितं वस्त्रसूत्राद्यैस् तस्य पुण्यफलं शृणु तद्वस्त्रपूततन्तूनां संख्या यावद् विधीयते ॥

6.275

तावद्वर्षसहस्राणि रुद्रलोके महीयते सूत्रवल्कलवालैर् वा शिक्यभाण्डसमाश्रयम् ॥

6.276

यः कृत्वा दामनीयोक्त्रं प्रग्रहं रज्जुम् एव वा एवम् आदीनि चान्यानि वस्तूनि विनिवेदयेत् ॥

6.277

शिवगोष्ठोपयोगार्थं तस्य पुण्यफलं शृणु यावत् तद्रज्जुसंख्यानं प्रदद्याच् छिवगोकुले ॥

6.278

तावच् चतुर्युगं देही शिवलोके महीयते यथा यथा प्रियं वस्त्रं शोभनं च यथा यथा ॥

6.279

तथा तथा महापुण्यं तद्दानाद् उत्तरोत्तरम् यः पन्थानं दिशेत् पृष्टं प्रणष्टं च गवादिकं ॥

6.280

स गोदानसमं पुण्यं प्रज्ञासौख्यं च विन्दति कृत्वोपकारम् आर्तानां स्वर्गं याति न संशयः ॥

6.281

अपि कण्टकम् उद्धृत्य किमुतान्यं महागुणम्(?) अन्नपानौषधीनां च यः प्रदातारम् उद्दिशेत् ॥

6.282

आर्तानां तस्य विज्ञेयं दातुस् तत्सदृशं फलम् शिवाय तस्य संरुद्धं कर्म तिष्ठति यद् विना ॥

6.283

तद् अल्पम् अपि यज्ञाङ्गं दत्त्वा यज्ञफलं लभेत् अपि काशकुशं सूत्रं गोमयं समिदिन्धनम् ॥

6.284

शिवयज्ञोपयोगार्थं प्रवक्ष्यामि समासतः सर्वेषां शिवभक्तानां दद्याद् यत् किंचिद् आदरात् दत्त्वा यज्ञफलं विद्यात् किमु तद्वस्तुदानतः ॥

6.285

॥ इति शिवोपनिषदि फलोपकरणप्रदानाध्यायः षष्ठः ॥

7.1

अथ स्वर्गापवर्गार्थे प्रवक्ष्यामि समासतः सर्वेषां शिवभक्तानां शिवाचारम् अनुत्तमम् ॥

7.2

शिवः शिवाय भूतानां यस्माद् दानं प्रयच्छति गुरुमूर्तिः स्थितस् तस्मात् पूजयेत् सततं गुरुम् ॥

7.3

नालक्षणे यथा लिङ्गे सांनिध्यं कल्पयेच् छिवः अल्पागमे गुरौ तद्वत् सांनिध्यं न प्रकल्पयेत् ॥

7.4

शिवज्ञानार्थतत्त्वज्ञः प्रसन्नमनसं गुरुम् शिवः शिवं समास्थाय ज्ञानं वक्ति न हीतरः ॥

7.5

गुरुं च शिववद् भक्त्या नमस्कारेण पूजयेत् कृताञ्जलिस् त्रिसंध्यं च भूमिविन्यस्तमस्तकः ॥

7.6

न विविक्तम् अनाचान्तम्(?) चङ्क्रमन्तं तथाकुलम् समाधिस्थं व्रजन्तं च नमस्कुर्याद् गुरुं बुधः ॥

7.7

व्याख्याने तत्समाप्तौ च संप्रश्ने स्नानभोजने भुक्त्वा च शयने स्वप्ने नमस्कुर्यात् सदा गुरुम् ॥

7.8

ग्रामान्तरम् अभिप्रेप्सुर् गुरोः कुर्यात् प्रदक्षिणम् सार्वाङ्गिकप्रणामं च पुनः कुर्यात् तदागतः ॥

7.9

पर्वोत्सवेषु सर्वेषु दद्याद् गन्धपवित्रकम् शिवज्ञानस्य चारम्भे प्रवासगमनागतौ ॥

7.10

शिवधर्मव्रतारम्भे तत्समाप्तौ च कल्पयेत् प्रसादनाय कुपितो विजित्य च रिपुं तथा ॥

7.11

पुण्याहे ग्रहशान्तौ च दीक्षायां च सदक्षिणम् आवार्य पदसंप्राप्तौ पवित्रे चोपविग्रहे ॥

7.12

उपानच्छत्रशयनं वस्त्रम् आसनभूषणम् पात्रदण्डाक्षसूत्रं वा गुरुसक्तं न धारयेत् ॥

7.13

हास्यनिष्ठीवनास्फोटम् उच्चभाष्यविजृम्भणम् पादप्रसारणं गतिं न कुर्याद् गुरुसंनिधौ ॥

7.14

हीनान्नपानवस्त्रः स्यान् नीचशय्यासनो गुरोः न यथेष्टश् च संतिष्ठेत् कलहं च विवर्जयेत् ॥

7.15

प्रतिवाते ऽनुवाते वा न तिष्ठेद् गुरुणा सह असंश्रये च सततं न किंचित् कीर्तयेद् गुरोः ॥

7.16

अन्यासक्तो न भुञ्जानो न तिष्ठन् अपराङ्मुखः न शयनो न चासीनः संभास्येद् गुरुणा सह ॥

7.17

दृष्ट्वैव गुरुम् आयान्तम् उत्तिष्ठेद् दूरतस् त्वरम् अनुज्ञातश् च गुरुणा संविशेच् चानुपृष्ठतः ॥

7.18

न कण्ठं प्रावृतं कुर्यान् न च तत्रावसक्तिकाम् न पादधावनस्नानं यत्र पश्येद् गुरुः स्थितः ॥

7.19

न दन्तधावनाभ्यङ्गम् आयामोद्वर्तनक्रियाः उत्सर्गपरिधानं च गुरोः कुर्वीत पश्यतः ॥

7.20

गुरुर् यद् अर्पयेत् किंचिद् गृहासन्नं तदञ्जलौ पात्रे वा पुरतः शिष्यस् तद् वक्रम् अभिवीक्षयन् ॥

7.21

यद् अर्पयेद् गुरुः किंचि तन् नम्रः पुरतः स्थितः पाणिद्वयेन गृह्णीयत् स्थापयेत् तच् च सुस्थितम् ॥

7.22

न गुरोः कीर्तयेन् नाम परोऽक्षम् अपि केवलम् समानसंज्ञम् अन्यं वा नाह्वयीत तदाख्यया ॥

7.23

स्वगुरुस् तद्गुरुश् चैव यदि स्यातां समं क्वचित् गुरोर् गुरुस् तयोः पूज्यः स्वगुरुश् च तदाज्ञया ॥

7.24

अनिवेद्य न भुञ्जीत भुक्त्वा चास्य निवेदयेत् नाविज्ञाप्य गुरुं गच्छेद् बहिः कार्येण केनचित् ॥

7.25

गुर्वाज्ञया कर्म कृत्वा तत्समाप्तौ निवेदयेत् कृत्वा च नैत्यकं सर्वम् अधीयीताज्ञया गुरोः ॥

7.26

मृद्भस्मगोमयजलं पत्रपुष्पेन्धनं समित् पर्याप्तम् अष्टकं ह्य् एतद् गुर्वर्थं तु समाहरेत् ॥

7.27

भैषज्याहारपात्राणि वस्त्रशय्यासनं गुरोः आनयेत् सर्वयत्नेन प्रार्थयित्वा धनेश्वरान् ॥

7.28

गुरोर् न खण्डयेद् आज्ञाम् अपि प्राणान् परित्यजेत् कृत्वाज्ञां प्राप्नुयान् मुक्तिं लङ्घयन् नरकं व्रजेत् ॥

7.29

पर्यटेत् पृथिवीं कृत्स्नां सशैलवनकाननाम् गुरुभैषज्यसिद्ध्यर्थम् अपि गच्छेद् रसातलम् ॥

7.30

यद् आदिशेद् गुरुः किंचित् तत् कुर्याद् अविचारतः अमीमांस्या हि गुरवः सर्वकार्येषु सर्वथा ॥

7.31

नोत्थापयेत् सुखासीनं शयानं न प्रबोधयेत् आसीनो गुरुम् आसीनम् अभिगच्छेत् प्रतिष्ठितम् ॥

7.32

पथि प्रयान्तं यान्तं च यत्नाद् विश्रमयेद् गुरुम् क्षित्पिपासातुरं स्नातं ज्ञात्वा शक्तं च भोजयेत् ॥

7.33

अभ्यङ्गोद्वर्तनं स्नानं भोजनष्ठीवमार्जनम् गात्रसंवाहनं रात्रौ पादाभ्यङ्गं च यत्नतः ॥

7.34

प्रातः प्रसाधनं दत्त्वा कार्यं संमार्जनाञ्जनम् नानापुष्पप्रकरणं श्रीमद्व्याख्यानमण्डपे ॥

7.35

स्थाप्यासनं गुरोः पूज्यं शिवज्ञानस्य पुस्तकम् तत्र तिष्ठेत् प्रतीक्षंस् तद् गुरोर् आगमनं क्रमात् ॥

7.36

गुरोर् निन्दापवादं च श्रुत्वा कर्णौ पिधापयेत् अन्यत्र चैव सर्पेत् तु निगृह्णीयाद् उपायतः ॥

7.37

न गुरोर् अप्रियं कुर्यात् पीडितस् तारितो ऽपि वा नोच्चारयेच् च तद्वाक्यम् उच्चार्य नरकं व्रजेत् ॥

7.38

गुरुर् एव पिता माता गुरुर् एव परः शिवः यस्यैव निश्चितो भावस् तस्य मुक्तिर् न दूरतः ॥

7.39

आहाराचारधर्माणां यत् कुर्याद् गुरुर् ईश्वरः तथैव चानुकुर्वीत नानुयुञ्जीत कारणम् ॥

7.40

यज्ञस् तपांसि नियमात् तानि वै विविधानि च गुरुवाक्ये तु सर्वाणि संपद्यन्ते न संशयः ॥

7.41

अज्ञानपङ्कनिर्मग्नं यः समुद्धरते जनम् शिवज्ञानात्महस्तेन कस् तं न प्रतिपूजयेत् ॥

7.42

इति यः पूजयेन् नित्यं गुरुमूर्तिस्थम् ईश्वरम् सर्वपापविनिर्मुक्तः प्राप्नोति परमं पदम् ॥

7.43

स्नात्वाम्भसा भस्मना वा शुक्लवस्त्रोपवीतवान् दूर्वागर्भस्थितं पुष्पं गुरुः शिरसि धारयेत् ॥

7.44

रोचनालभनं कुर्याद् धूययेद् आत्मनस् तनुम् अङ्गुलीयाक्षसूत्रं च कर्णमात्रे च धारयेत् ॥

7.45

गुरुर् एवंविधः श्रीमान् नित्यं तिष्ठेत् समाहितः यस्माज् ज्ञानोपदेशार्थं गुरुर् आस्ते सदाशिवः ॥

7.46

धारयेत् पादुके नित्यं मृदुवर्मप्रकल्पिते प्रगृह्य दण्डं छत्त्रं वा पर्यटेद् आश्रमाद् बहिः ॥

7.47

न भूमौ विन्यसेत् पादम् अन्तर्धानं विना गुरुः कुशपादकम् आक्रम्य तर्पणार्थं प्रकल्पयेत् ॥

7.48

पादस्थानानि पत्त्राद्यैः कृत्वा देवगृहं विशेत् पात्रास्तरितपादश् च(?) नित्यं भुञ्जीत वाग्यतः ॥

7.49

न पादौ धावयेत् कांस्ये लोहे वा परिकल्पिते शौचयेत् तृणगर्भायां द्वितीयायां तथाचमेत् ॥

7.50

न रक्तम् उल्बणं वस्त्रं धारयेत् कुसुमानि च न बहिर् गन्धमाल्यानि वासांसि मलिनानि च ॥

7.51

केशास्थीनि कपालानि कार्पासास्थितुषाणि च अमेध्याङ्गारभस्मानि नाधितिष्ठेद् रजांसि च ॥

7.52

न च लोष्टं विमृद्नीयान् न च छिन्द्यान् नखैस् तृणम् न पत्त्रपुष्पमूल्यानि वंशमङ्गलकाष्ठिताम् ॥

7.53

एवम् आदीनि चान्यानि पाणिभ्यां न च मर्दयेत् न दन्तखादनं कुर्याद् रोमाण्य् उत्पाटयेन् न च ॥

7.54

न पद्भ्याम् उल्लिखेद् भूमिं लोष्टकाष्ठैः करेण वा न नखांश् च नखैर् विध्यान् न कण्डूयेन् नखैस् तनुम् ॥

7.55

मुहुर्मुहुः शिरः श्मश्रु न स्पृशेत् करजैर् बुधः न लिक्षाकर्षणं कुर्याद् आत्मनो वा परस्य वा ॥

7.56

सौवर्ण्यरौप्यताम्रैश् च शृङ्गदन्तशलाकया देहकण्डूयनं कार्यं वंशकाष्ठीकवीरणैः(?) ॥

7.57

न विचित्तं प्रकुर्वीत दिशश् चैवावलोकयन् न शोकार्तश् च संतिष्ठेद् धूत्वा पाणौ कपोलकम् ॥

7.58

न पाणिपादवाक्चक्षुःश्रोत्रशिश्नगुदोदरैः चापलानि न कुर्वीत स सर्वार्थम् अवाप्नुयात् ॥

7.59

न कुर्यात् केनचिद् वैरम् अध्रुवे जीविते सति लोककौतूहलं पापं संध्यां च परिवर्जयेत् ॥

7.60

न कुद्वारेण वेश्मानि नगरं ग्रामम् आविशेत् न दिवा प्रावृतशिरा रात्रौ प्रावृत्य पर्यटेत् ॥

7.61

नातिभ्रमणशीलः स्यान् न विशेच् च गृहाद् गृहम् न चाज्ञानम् अधीयीत शिवज्ञानं समभ्यसेत् ॥

7.62

शिवज्ञानं परं ब्रह्म तद् आरभ्य न संत्यजेत् ब्रह्मासाध्य च यो गच्छेद् ब्रह्महा स प्रकीर्तितः ॥

7.63

कृताञ्जलिः स्थितः शिष्यो लघुवस्त्रम् उदङ्मुखः शिवमन्त्रं समुच्चार्य प्राङ्मुखो ऽध्यापयेद् गुरुः ॥

7.64

नागदन्तादिसंभूतं चतुरश्रं सुशोभनम् हेमरत्नचितं वापि गुरोर् आसनम् उत्तमम् ॥

7.65

न शुश्रूषार्थकामाश् च न च धर्मः प्रदृश्यते न भक्तिर् न यशः क्रौर्यं न तम् अध्यापयेद् गुरुः ॥

7.66

देवाग्निगुरुगोष्ठीषु व्याख्याध्ययनसंसदि प्रश्ने वादे ऽनृते ऽशौचे दक्षिणं बाहुम् उद्धरेत् ॥

7.67

वशे सततनम्रः स्यात् संहृत्याङ्गानि कूर्मवत् तत्संमुखं च निर्गच्छेन् नमस्कारपुरस्सरः ॥

7.68

देवाग्निगुरुविप्राणां न व्रजेद् अन्तरेण तु नार्पयेन् न च गृह्णीयात् किंचिद् वस्तु तदन्तरा ॥

7.69

न मुखेन धमेद् अग्निं नाधःकुर्यान् न लङ्घयेत् न क्षिपेद् अशुचिं वह्नौ न च पादौ प्रतापयेत् ॥

7.70

तृणकाष्ठादिगहने जन्तुभिश् च समाकुले स्थाने न दीपयेद् अग्निं दीप्तं चापि ततः क्षिपेत् ॥

7.71

अग्निं युगपद् आनीय धारयेत प्रयत्नतः ज्वलन्तं न प्रदीपं च स्वयं निर्वापयेद् बुधः ॥

7.72

शिवव्रतधरं दृष्ट्वा समुत्थाय सदा द्रुतम् शिवो ऽयम् इति संकल्प्य हर्षितः प्रणमेत् ततः ॥

7.73

भोगान् ददाति विपुलान् लिङ्गे संपूजितः शिवः अग्नौ च विविधां सिद्धिं गुरौ मुक्तिं प्रयच्छति ॥

7.74

मोक्षार्थं पूजयेत् तस्माद् गुरुमूर्तिस्थम् ईश्वरम् गुरुभक्त्या लभेज् ज्ञानं ज्ञानान् मुक्तिम् अवाप्नुयात् ॥

7.75

सर्वपर्वसु यत्नेन ह्य् एषु संपूजयेच् छिवम् कुर्याद् आयतने शोभां गुरुस्थानेषु सर्वतः ॥

7.76

नरद्वयोच्छ्रिते पीठे सर्वशोभासमन्विते संस्थाप्य मणिजं लिङ्गं स्थाने कुर्याज् जगद्धितम् ॥

7.77

अन्नपानविशेषैश् च नैवेद्यम् उपकल्पयेत् भोजयेद् व्रतिनश् चात्र स्वगुरुं च विशेषतः ॥

7.78

पूजयेच् च शिवज्ञानं वाचयीत च पर्वसु दर्शयेच् छिवभक्तेभ्यः सत्पूजां परिकल्पिताम् ॥

7.79

प्रियं ब्रूयात् सदा तेभ्यः प्रदेयं चापि शक्तितः एवं कृते विशेषेण प्रसीदति महेश्वरः ॥

7.80

छिन्नं भिन्नं मृतं नष्टं वर्धते नास्ति केवलम् इत्य् आद्यान् न वदेच् छब्दान् साक्षाद् ब्रूयात् तु मङ्गलम् ॥

7.81

अधेनुं धेनुम् इत्य् एव ब्रूयाद् भद्रम् अभद्रकम् कपालं च भगालं स्यात् परमं मङ्गलं वदेत् ॥

7.82

ऐन्द्रं धनुर् मणिधनुर् दाहकाष्ठादि चन्दनम् स्वर्यातं च मृतं ब्रूयाच् छिवीभूतं च योगिनम् ॥

7.83

द्विधाभूतं वदेच् छिन्नं भिन्नं च बहुधा स्थितम् नष्टम् अन्वेषणीयं च रिक्तं पूर्णाभिवर्धितम् ॥

7.84

नास्तीति शोभनं सर्वम् आद्यम् अङ्गाभिवर्धनम् सिद्धिमद् ब्रूहि गच्छन्तं सुप्तं ब्रूयात् प्रवर्धितम् ॥

7.85

न म्लेच्छमूर्खपतितैः क्रूरैः संतापवेदिभिः दुर्जनैर् अवलिप्तैश् च क्षुद्रैः सह न संवदेत् ॥

7.86

नाधार्मिकनृपाक्रान्ते न दंशमशकावृते नातिशीतजलाकीर्णे देशे रोगप्रदे वसेत् ॥

7.87

नासनं शयनं पानं नमस्काराभिवादनम् सोपानत्कः प्रकुर्वीत शिवपुस्तकवाचनम् ॥

7.88

आचार्यं दैवतं तीर्थम् उद्धूतोदं मृदं दधि वटम् अश्वत्थकपिलां दीक्षितोदधिसंगमम् ॥

7.89

यानि चैषां प्रकाराणि मङ्गलानीह कानिचित् शिवायेति नमस्कृत्वा प्रोक्तम् एतत् प्रदक्षिणम् ॥

7.90

उपानच्छत्त्रवस्त्राणि पवित्रं करकं स्रजम् आसनं शयनं पानं धृतम् अन्यैर् न धारयेत् ॥

7.91

पालाशम् आसनं शय्यां पादुके दन्तधावनम् वर्जयेच् चापि निर्यासं रक्तं न तु समुद्भवम् ॥

7.92

संध्याम् उपास्य कुर्वीत नित्यं देहप्रसाधनम् स्पृशेद् वन्देच् च कपिलां प्रदद्याच् च गवां हितम् ॥

7.93

यः प्रदद्याद् गवां सम्यक् फलानि च विशेषतः क्षेत्रम् उद्दामयेच् चापि तस्य पुण्यफलं शृणु ॥

7.94

यावत् तत्पत्त्रकुसुमकन्दमूलफलानि च तावद्वर्षसहस्राणि शिवलोके महीयते ॥

7.95

कृशरोगार्तवृद्धानां त्यक्तानां निर्जने वने क्षुत्पिपासातुराणां च गवां विह्वलचेतसाम् ॥

7.96

नीत्वा यस् तृणतोयानि वने यत्नात् प्रयच्छति करोति च परित्राणं तस्य पुण्यफलं शृणु ॥

7.97

कुलैकविंशकोपेतः पत्नीपुत्रादिसंयुतः मित्रभृत्यैर् उपेतश् च श्रीमच्छिवपुरं व्रजेत् ॥

7.98

तत्र भुक्त्वा महाभोगान् विमानैः सार्वकामिकैः स महाप्रलयं यावत् तदन्ते मुक्तिम् आप्नुयात् ॥

7.99

गोब्राह्मणपरित्राणं सकृत् कृत्वा प्रयत्नतः मुच्यते पञ्चभिर् घोरैर् महद्भिः पातकैर् द्रुतम् ॥

7.100

अहिंसा सत्यम् अस्तेयं ब्रह्मचर्यम् अकल्कता अक्रोधो गुरुशुश्रूषा शौचं संतोषम् आर्जवम् ॥

7.101

अहिंसाद्या यमाः पञ्च यतीनां परिकीर्तिताः अक्रोधाद्याश् च नियमाः सिद्धिवृद्धिकराः स्मृताः ॥

7.102

दशलाक्षणिको धर्मः शिवाचारः प्रकीर्तितः योगीन्द्राणां विशेषेण शिवयोगप्रसिद्धये ॥

7.103

न विन्दति नरो योगं पुत्रदारादिसंगतः निबद्धः स्नेहपाशेन मोहस्तम्भबलीयसा ॥

7.104

मोहात् कुटुम्बसंसक्तस् तृष्णया शृङ्खलीकृतः बालैर् बद्धस् तु लोको ऽयं मुसलेनाभिहन्यते ॥

7.105

इमे बालाः कथं त्याज्या जीविष्यन्ति मया विना मोहाद् धि चिन्तयत्य् एवं परमार्थौ न पश्यति ॥

7.106

संपर्काद् उदरे न्यस्तः शुक्रबिन्दुर् अचेतनः स पित्रा केन यत्नेन गर्भस्थः परिपालितः ॥

7.107

कर्कशाः कठिना भक्षा जीर्यन्ते यत्र भक्षिताः तस्मिन्न् एवोदरे शुक्रं किं न जीर्यति भक्ष्यवत् ॥

7.108

येनैतद् योजितं गर्भे येन चैव विवर्धितम् तेनैव निर्गतं भूयः कर्मणा स्वेन पाल्यते ॥

7.109

न कश्चित् कस्यचित् पुत्रः पिता माता न कस्यचित् यत् स्वयं प्राक्तनं कर्म पिता मातेति तत् स्मृतम् ॥

7.110

येन यत्र कृतं कर्म स तत्रैव प्रजायते पितरौ चास्य दासत्वं कुरुतस् तत्प्रचोदितौ ॥

7.111

न कश्चित् कस्यचिच् छक्तः कर्तुं दुःखं सुखानि च करोति प्राक्तनं कर्म मोहाल् लोकस्य केवलम् ॥

7.112

कर्मदायादसंबन्धाद् उपकारः परस्परम् दृश्यते नापकारश् च मोहेनात्मनि मन्यते ॥

7.113

ईश्वराधिष्ठितं कर्म फलतीह शुभाशुभम् ग्रामस्वामिप्रसादेन सुकृतं कर्षणं यथा ॥

7.114

द्वयं देवत्वमोक्षाय ममेति न ममेति च ममेति बध्यते जन्तुर् न ममेति विमुच्यते ॥

7.115

द्व्यक्षरं च भवेन् मृत्युस् त्र्यक्षरं ब्रह्म शाश्वतम् ममेति द्व्यक्षरं मृत्युस् त्र्यक्षरं न ममेति च ॥

7.116

तस्माद् आत्मन्य् अहंकारम् उत्सृज्य प्रविचारतः विधूयाशेषसङ्गांश् च मोक्षोपायं विचिन्तयेत् ॥

7.117

ज्ञानाद् योगपरिक्लेशं कुप्रावरणभोजनम् कुचर्यां कुनिवासं च मोक्षार्थी न विचिन्तयेत् ॥

7.118

न दुःखेन विना सौख्यं दृश्यते सर्वदेहिनाम् दुःखं तन्मात्रकं ज्ञेयं सुखम् आनन्त्यम् उत्तमम् ॥

7.119

सेवायां पाशुपाल्ये च वानिज्ये कृषिकर्मणि तुल्ये सति परिक्लेशे वरं क्लेशो विमुक्तये ॥

7.120

स्वर्गापवर्गयोर् एकं यः शीघ्रं न प्रसाधयेत् याति तेनैव देहेन स मृतस् तप्यते चिरम् ॥

7.121

यद् अवश्यं पराधीनैस् त्यजनीयं शरीरकम् कस्मात् तेन विमूढात्मा न साधयति शाश्वतम् ॥

7.122

यौवनस्था गृहस्थाश् च प्रासादस्थाश् च ये नृपाः सर्व एव विशीर्यन्ते शुष्कस्निग्धान्नभोजनाः ॥

7.123

अनेकदोषदुष्टस्य देहस्यैको महान् गुणह् यां याम् अवस्थाम् आप्नोति तां ताम् एवानुवर्तते ॥

7.124

मन्दं परिहरन् कर्म स्वदेहम् अनुपालयेत् वर्षासु जीर्णकटवत् तिष्ठन् अप्य् अवसीदति ॥

7.125

न ते ऽत्र देहिनः सन्ति ये तिष्ठन्ति सुनिश्चलाः सर्वे कुर्वन्ति कर्माणि विकृशाः पूर्वकर्मभिः ॥

7.126

तुल्ये सत्य् अपि कर्तव्ये वरं कर्म कृतं परम् यः कृत्वा न पुनः कुर्यान् नानाकर्म शुभाशुभम् ॥

7.127

तस्माद् अन्तर्बहिश्चिन्ताम् अनेकाकारसंस्थिताम् संत्यज्यात्महितार्थाय स्वाध्यायध्यानम् अभ्यसेत् ॥

7.128

विविक्ते विजने रम्ये पुष्पाश्रमविभूषिते स्थानं कृत्वा शिवस्थाने ध्यायेच् छान्तं परं शिवम् ॥

7.129

ये ऽतिरम्याण्य् अरण्यानि सुजलानि शिवानि तु विहायाभिरता ग्रामे प्रायस् ते दैवमोहिताः ॥

7.130

विवेकिनः प्रशान्तस्य यत् सुखं ध्यायतः शिवम् न तत् सुखं महेन्द्रस्य ब्रह्मणः केशवस्य वा ॥

7.131

इति नामामृतं दिव्यं महाकालाद् अवाप्तवान् विस्तरेणानुपूर्वाच् च ऋष्यात्रेयः(?) सुनिश्चितम् ॥

7.132

प्रज्ञाम् अथा विनिर्मथ्य(?) शिवज्ञानमहोदधिम् ऋष्यात्रेयः समुद्धृत्य प्राहेदम् अणुमात्रकम् ॥

7.133

शिवधर्मे महाशास्त्रे शिवधर्मस्य चोत्तरे यद् अनुक्तं भवेत् किंचित् तद् अत्र परिकीर्तितम् ॥

7.134

त्रिदैवत्यम् इदं शास्त्रं मुनीन्द्रात्रेयभाषितम् तिर्यङ्ङ्नुजदेवानां सर्वेषां च विमुक्तिदम् ॥

7.135

नन्दिस्कन्दमहाकालास् त्रयो देवाः प्रकीर्तिताः चन्द्रात्रेयस् तथात्रिश् च ऋष्य् आत्रेयो मुनित्रयम् ॥

7.136

एतैर् महात्मबिः प्रोक्ताः शिवधर्माः समासतः सर्वलोकोपकारार्थं नमस् तेभ्यः सदा नमः ॥

7.137

तेषां शिष्यप्रशिष्यैश् च शिवधर्मप्रवक्तृभिः व्याप्तं ज्ञानसरः शार्वं विकचैर् इव पङ्कजैः ॥

7.138

ये श्रावयन्ति सततं शिवधर्मं शिवार्थिनाम् ते रुद्रास् ते मुनीन्द्राश् च ते नमस्याः स्वभक्तितः ॥

7.139

ये समुत्थाय शृण्वन्ति शिवधर्मं दिने दिने ते रुद्रा रुद्रलोकेशा न ते प्रकृतिमानुषाः ॥

7.140

शिवोपनिषदं ह्य् एतद् अध्यायैः सप्तभिः स्मृतम् ऋष्यात्रेयसगोत्रेण मुनिना हितकाम्यया ॥

7.141

॥ इति शिवोपनिषदि शिवाचाराध्यायः सप्तमः ॥